No. ४२३८

Title शास्त्रदीपिका षष्ठाध्यायः

Author पार्थसारथिमिश्रः

Extent ४२ पत्र Age सं. १८६४

Subject मीमांसा.

शास्त्रदीपिका षष्ठाध्यायः

४२३८

शास्त्रदीपिकायां षष्ठोध्यायः ५२ पत्रे

शा०
१

श्रीगणेशाय नमः॥ ॥द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसंबंधः भेदादिलक्षणैरेवमनुष्ठेयेन निरूपिते केनेनाधिक्रिये
तेति सांप्रतं संप्रधार्यते तदुपोद्घातरूपेणत्वादावेतद्विचार्यते कर्मभिः पुरुषः कर्तारमधिक्रियते न वा सत्यधिका
रे कस्य कुत्राधिकार इति चिंतयितुं लक्षणमारब्धव्यमिति तत्सिध्यर्थमधिकारसद्भावः प्रथमं प्रतिपाद्यते दर्शपू
र्णमासाभ्यां स्वर्गकामो यजेत चित्रया पशुकामः इत्यादिषु किं पुरुषस्याधिकारः स्वाम्यं कर्मजन्यफलभोक्तृत्वमस्ति ने
ति चिंत्यते तदर्थमिदं विचार्यते येयं प्रत्ययोपात्ता भावना तस्यां किं धात्वर्थ एव भाव्यः प्रधानं स्वर्गादिस्तु साधनत
या गुणभूतं उत काम्यमानत्वेनोपात्तः स्वर्गादिरेव भाव्यस्तत्साधनं च धात्वर्थ इति तत्राप्येतद्विवेक्तव्यं योऽत्र क्रिया
याः स्वर्गकामादेश्च पुरुषस्य क्रियाकर्तृरूपः संबंधः तत्र किं क्रिया प्रधानतः पुरुषो गुणतस्ततो विपरीतं वेति प
दिगुणतः पुरुषस्तत्तस्य गुणभावं क्रियाक्षेपादेव सिद्धमनूद्य स्वर्गादिद्रव्यं साधनत्वेन विधीयते काम्यतिश्च
साधनकामनानुवादः तदयमर्थः स्वर्गसाधनत्वेन काम्यमानो यजेत स्वर्गेण यागं कुर्यादित्यर्थः यद्वा स्वर्गकाम राम १

नैवसमुद्रमनोध्यानवत् गुणभूतवद्विशेषणं सतो यागांगमुपदिश्यत इति द्विधा पूर्वः पक्षः अथ प्रधानतः पुरुषस्त
त्तस्यात्मार्था स्वर्गादिगोचरप्रवृत्तिः प्रत्ययेनाविधीयते साधनतया च याग उपदिश्यते स्वर्गादिकामो यागेन कुर्यादात्मा
र्थं प्रवृत्तिमिति स्वर्गकामस्यात्मार्था प्रवृत्तिः स्वर्गविषयैवेति स्वर्गभावनैवानेन प्रकारेणोपदिष्टा भवतीति न ह्ययमर्थः स्व
र्गं यः प्राप्तुमिच्छति स यागेन कुर्यादभिलषितं स्वर्गश्च तस्याभिलषित इति स्वर्गं भावयेद्यागेनेत्युक्तं भवति स्वर्गकामोऽह
रणोनु प्रथम पूर्वपक्षो यपि कृतयाद्दमापि चिंत्यते स्वर्गशब्दो द्रव्यवचनः प्रीतिवचनो वेति प्रीतिवचनत्वे तु तस्याः साधन
तासंभवाद्द्रव्यं तावदालंबनः प्रथमः पक्षः स्यादिति तत्र पूर्वः पक्षः धात्वर्थस्यैव भाव्यत्वं पदस्थत्वात्प्रतीयते स्वर्गादेः स
त्तुवाक्येन श्रूयते वासिंचंदनबलं भूतं च स्वर्गपश्वादिद्रव्यं भव्यापवकर्म्मणि उपदेश्यं न भूतायमव्यक्तमोपदेशनं स्वर्गशब्दश्च
स्त्रादिषु प्रयोगात् द्रव्यवचन इति न साधनत्वासंभवः पश्वादेस्त्वसंदिग्धमेव द्रव्यवचनत्वं अथवा स्वर्गादिकामनैव या
गांगमिति सर्वथा याग एव भाव्यो न तेनान्यत् फलमस्ति च फलेऽधिकाराभावान्नारंभणीयमधिकारलक्षणं ननेव

शा० मफलेकर्मणि न कश्चित्प्रवर्त्तेत। मा प्रवर्त्तिष्ट विघ्नः छिन्नं नैतावता शक्यं फलमुपगंतुं अफलस्य कर्मणो धर्मत्वं नासिध्यतीत्ये
२ तदपि भवतु तथा सति चोदनालक्षणो धर्म इति प्रस्तुतं स्यादिसेन दर्शितस्तत्पंतदधीनं च सकलं शास्त्रमिति सकलशास्त्राक्षे
पेणेदमधिकरणमारब्धं विधिरपि पुरुषं प्रवर्त्तयति न तु फलवत्तां गमयति न च प्रवर्त्तितोपि कश्चिदफले प्रवर्त्तत इति व्य
र्थ एव विधिरिति प्राप्ते अभिधीयते यदुक्तं ते वलीयस्या विधिश्रुत्या हि भावना अवरुद्धा न यागादि भाव्यमालंबितुं क्षमा
। स्वर्गादिः कामनायोगात् न फलत्वेनैव गम्यते स्वरसात् पुरुषार्थो हि कामनापदगोचरः लिङादयो विधिं भावनां चा
भिदधति तेन प्रकृत्युपात्तयागसंबंधात् पूर्वं प्रतीयते प्रवर्त्तनारूपश्च विधिः प्रवृत्तिहेतुश्च व्यापारः प्रवर्त्तनातद्योगिता
चापुरुषार्थभाव्याया भावनाया न संभवतीति यागातिक्रमेण पुरुषार्थस्यैव भाव्यत्वं विधिश्रुतिबलादध्यवसीयते कः स्य पु
नरसौ प्रवर्त्तनारूपो व्यापारः शब्दस्येति ब्रूमः तस्य सन्निहितत्वादन्यस्य चाप्रतीतेः यद्यपि शास्याचेतनत्वादाज्ञादिव्या एम
पारसंभवः तथापि योस्य व्यापारः संभवति तस्यैव यथा प्रवर्त्तनारूपत्वं संपद्यते तथा प्रतिपत्तव्यं अंशत्रयविशिष्टभाव २

नाप्रतिपादनंचास्यव्यापारः तत्रपरिभाषांशे पुरुषार्थउपनीयतेततस्तत्प्रतिपादनंप्रवृत्तिहेतुर्भवतिनान्यथातेनशब्दकर्तृ
कस्यार्थप्रतिपादनरूपस्यव्यापारस्यप्रवर्त्तनारूपत्वंसंपादयितुंतद्विषयभूतायाभावनायाःपुरुषार्थभाव्यत्वंनिश्चीयतेस्व
र्गादिश्चकामनायोगात्भाव्यतयागम्यते भाव्यविषयाहिमुख्यरूपेणकामनासाधनेषुतुतत्त्वंबंधनिमित्तागौणीनचात्र
गौण्याग्रहणेप्रमाणमस्तितस्माद्विधिश्रुतेःकामनायोगाच्चस्वर्गस्यभाव्यतामेवभाव्यत्वंयागश्चतत्साधनंप्रतिवचन
श्चस्वर्गशब्दःतामनभिधायतद्विशिष्टद्रव्याभिधानासंभवात्द्रव्यस्वरूपमात्रेचाप्रयोगात् अतःस्वर्गादिकामस्यपुरुष
स्यतद्भावनायागादिविशिष्टाविधीयते यद्यपिचस्वर्गकामस्यार्थान्तरविषयाप्रवृत्तिःशेषत्वेनसंभवतितथापिपुरुषान्त
रशेषत्वस्यापिसंभवात्स्वर्गकामस्यचकदाचित्फलान्तरमनिस्तच्छेषितासंभवान्नस्वर्गकामार्थप्रवृत्तित्वेननिर्दिश्यते येवहि
स्वर्गकामेषुशेषत्वेनानुस्मृतापुरुषान्तरेष्यश्चव्यावृत्तास्वर्गार्थाप्रवृत्तिःसैवस्वर्गकामप्रावृत्तिरित्येवंविशेषणंसहते अतश्च
स्वर्गकामार्थप्रवृत्त्यपदेशान्ततत्साधनत्वेनविहितोयागःस्वर्गसाधनत्वेनैवविहितोभवति फलसाधनेचकर्मणिफल

शा० भागिनःपुरुषस्यसिद्धोधिकारइतिलक्षणमारब्धव्यं फलार्थिनांकर्मणःशास्त्रंसर्वाधिकारंस्यात् सिद्धेधिकारेसकिंसम
३ ग्रानुष्ठानसमर्थानामंधबधिरपंगुमूकादेवानिरर्थानामपि किंवासर्वथानांमनुष्याणामितिसंशयः तत्रयदिसर्वथाधिका
रसंगविनियोगः ततःसर्वेषामथयथाविनियोगमधिकारः ततःसमग्रानुष्ठानसमर्थानामेव तत्रप्रधानवाक्येन
सर्वेषामधिकारधीः ज्ञापनेनतद्दशेनांगवाक्यानामुपवर्णनं दर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेतिप्रधानवाक्ये
नसर्वेषांस्वर्गकामाधिकारंकर्मावगतंतदनुसारेणिचांगवाक्यानिनतत्संकोचायालमतश्चक्षुष्मंतंप्रत्याज्यावेक्षणवि
धिरचक्षुष्मतश्चविध्यविध्यभावात्तद्रहितमेवफलसाधनं एवंबधिरस्यवाचनरहितंमूकस्यमंत्रोच्चारणरहितंपंगोश्च
संक्रमणरहितमितिसर्वेषामर्थिनामशक्यांगरहितकर्मानुष्ठानात्सिद्धोधिकारः स्यादेवमर्थिनांनिरर्थानांतुसांपरायिक
फलकामनाभावात्कथमधिकारशंकातेषामपिचतुर्दश्युपवासादिदर्शनाद्दस्यवादृशार्थितेतिमन्यते अत्रोच्यते ने राम
वाज्यावेक्षणादीनांपुरुषंप्रतिचोदनायतोसमर्थस्तच्छून्यंकर्मकृत्वाधिकारभाक् पुरुषंप्रतिहिविधीयमानमसमर्थंप्र ३

स्यविहितत्वादनंगमेवेति तद्विहितमेव कर्माविगुणं समग्रं फलं साधयेत् क्रतुं प्रति विधिस्तेषां तादृशं तं च शक्नुवन् कृत्वा
फलमवाप्नोति ततोऽन्यस्यानधिक्रिया नहि सा तत्रैगुण्यांगवाक्यानि पुरुषसंबध्यंते प्रधानवाक्यशेषत्वात्तेषां तद्युक्तेन तु प्रधा
नवाक्येन तदंगमुक्तः क्रतुः पुरुषैः संयुज्यमानोऽसमर्थान् परिहाय समर्थान् प्रति विज्ञापयति अतोऽधस्य क्रतुरेवाविहितो न त्वा
ज्यावेक्षणमेवाविहितमितरत्त्वविहितमिति मन्तव्यं न च प्रधानवाक्यविरोधात्सर्वाधिकारनिश्चयः विशेषाभावाद्धि सर्वाधि
कारः यत्र तु प्रधानवाक्यविरोधो यावज्जीवादौ तत्र भवत्येव यथाशक्तिप्रयोगादपि फलमिति वक्ष्यते न दृविरोधे तु सर्वांगयुक्त
कर्मानुष्ठानादेव फलं। तिरश्चां तु प्रधानमात्रेऽपि सामर्थ्याभावान्न क्वचिदधिकारः। ऋषीणां त्वनादौ संसारे पूर्वपूर्वभृग्वा
दिवरणसंभवात् अस्त्येवाधिकार इति आर्षेयप्रदाहरणमनादर्तव्यं। देवतानां त्वासां देशेन त्यागासंभवा द्दिग्रहाभावाच्चाशक्तेर
नधिकारः लिंगविशेषनिर्देशात् पुंयुक्तमेति शाबरः॥ इदानीं किं पुंस एवाधिकार उत स्त्रिया अपीति संशयः। तत्र पुल्लिं
गनिर्देशात् पुंस एवाधिकारिता। प्रकृतस्यार्थेतया लिंगसंख्यावन्नाविवक्षितं विभक्त्यर्थस्य हि संख्याया ग्रहाधिकरणे विवक्षि

रा०
४

तत्त्वमुक्तं। लिंगं तु प्रातिपदिकार्थो ग्रहवद्विवक्षितं उद्देश्योपि फलकामो विवक्षितलिंगः —तः पुमानेव स्यात् अदृष्टत्वाच्च स्त्रिया
इष्ट्यात्यागात्मकयागानुष्ठानासंभवादननुष्ठाने चाधिकारासंभवादनधिकारः तथा भार्या पुत्रश्च दासस्त्रय एवाधनाः स्मृ
ता इति स्मरणाद् अतः पुंस एवाधिकारः उच्यते। प्रकृत्यार्थोपि स्वत्वे तदुद्देश्यस्य विशेषणं। संख्यापातुल्यनीतित्वान्न विवक्षा
प्रपद्यते। ग्रहस्तूद्देश्यत्वाद्विवक्षितो न प्रातिपदिकार्थत्वात्। लिंगं तु प्रातिपदिकार्थोप्युद्देश्यविशेषणत्वादविवक्षितं वाक्य
भेदप्रसंगात्। अनपेक्षितपरिच्छेदत्वाच्चोद्दिश्यमानस्य न चायं प्रातिपदिकार्थो विभक्तिविकाराणां टाबादीनां चान्वयव्य
तिरेकाभ्यां लिंगाभिधायित्वाद् अतः संख्यावदविवक्षितमिति स्त्रिया अप्यधिकारः न चादृष्टत्वमस्याः कर्तनादिभिरर्ज
नसंभवात् पित्रादिदत्तसंभवाद् दायसंभवाच्च पुत्राभावे दुहितेत्यादिस्मरणात् पत्यार्जितस्य चोभयसाधारणत्वाद्धर्मे चा
र्थे च नातिचरितव्या पाणिग्रहणात् सहत्वं कर्मसु तथा पुण्यफलेषु द्रव्यपरिग्रहेषु चेत्यादिवचनात् पत्नी पत्नीवाद्री
नि स्यादिमं मन्त्रवर्णेभ्यश्च स्वस्त्र्यस्याप्यधिकारः पत्नीशब्दस्य स्वामीवचनत्वात् भार्यापुत्रश्चेति वचनं बहुश्रुतिस्मृतिविरु एम ८

इत्यादस्वातंत्र्यपरं व्याख्येयं॥ स्ववतोस्तु वचनादैककर्म्यं स्यात्॥ सिद्धे द्वयोरधिकारे किं दंपती पृथक्प्रयुंजीयातां उत सहेति चिंतायां
माख्यातोपात्तायाः संख्यायाः गुणभूतोपादेयकर्तृगामित्वेन विवक्षितत्वादेकैकशः प्रयोगे प्राप्ते सहेति ब्रूमः। तथा
हि कर्मसमग्रं भवतीत्यर्थाच्चेद् गुण्यपं स्यात्। यजमानप्रयोगे पत्न्यवेक्षणान्वारंभादिलोपात्तत्प्रयोगे च यजमानावेक्षणादि
लोपाच्च ऋत्विग्वत्परिक्रयेण यजमानः पत्नीं साचतमुपादातुं शक्नुतः स्वामिवचनत्वात्पत्नीयजमानशब्दयोः स्वामिन
श्च परिक्रयेणासंपत्तेरन्योन्यस्याकल्प्यालोचनया सह प्रयोगमध्यवस्यामः। संसृष्टद्रव्यत्वाच्च तयोर्विभागप्रतिषेधाच्च न पृ
थक्प्रयोक्तृत्वसंभवः परस्परसापेक्षयोरेवाग्नीषोमयोरिव देवतात्वं दंपत्योः कर्तृत्वं कर्तृरूपैकाख्यातोपात्तैकत्वसंख्या
ग्नीषोमयोर्देवनेनेति चेत्सहप्रयोगेप्यविरुद्धं तस्मात्सहप्रयोगः॥ आधानं चाद्वियज्ञवत्। आधानं प्रकृत्य क्षौमे वसानावग्नि
मादधीयातामिति श्रुतं। तत्र संशयः॥ किमाधानं द्वौ पुमांसौ सह स्त्रीकौ सह कुर्यातां उतैक इति। पूर्वत्राख्यातसंख्यायाः क
र्तृरूपान्वयः स्थितः। तेनेह कर्तृरूपस्य भेदे द्विवचनार्थं वेत्। वसानाविति चोक्ताः एतत्पुंद्वयं संप्रतीयते॥ द्वित्वपुंस्त्वे हि त

तद्वाच्येनियम्यते च ते मिथः यद्यपि पुंवद्भाववतः स्त्रीपुंसयोरपि द्विवचनमोकारान्तं दृष्टं कुकुटश्च कुक्कुटी च कुक्कुटाविति तथाप्युभ
याथ्यभिधा एतत् पुंस्त्वं द्वित्वं चास्याभिधेयं तयोश्चाभिहितयोरसति स्त्रीसद्वितीयमर्थे प्रणेपरस्य रनियमात् पुमांसावेव द्वौ गम्येते
।तयोश्चोत्पत्तावप्राप्तेस्तद्विधानार्थमेवेदं वचनं उत्पत्तिवाक्यस्यत्वाधानविधिपरत्वेनार्थवत्वारेकवचनं निर्देशान्नार्थभाविष्य
ति। क्षौमशब्दश्चदुःसुशब्दः इत्यस्मादुत्पन्नः शब्दवत्वानुसारः मलिनत्वेन क्षौमसादृश्याद्वागोणस्तस्माद्वौ पुमांसौ एवं चात्सं
तसंनिकृष्टार्थविधानाल्लक्षणानुग्रहः क्षौमवसनसंबंधविधावत्संतांवाक्यस्यादिति प्राप्तेभिधीयते।एकरावकुन ॥ क्षौमशब्दे
नमुख्यः सन्मुख्यमर्थं परित्यजेत्। नापि धात्वर्थयोगेन वर्तते रूढिसंभवात्। वसानक्षौमशब्दौ चतवस्यातामनर्थकौ द्वित्वमात्र
विधायित्वात् तस्मात् क्षौमं विधीयते। तद्विधाने च पुंद्वित्वं विधातुं नैव शक्यते। उत्पत्तिवाक्यादन्यत्र नानेकार्थविधिर्यतः ४ सन्नि
कृष्टश्चशब्दस्य धर्मो नितरनुग्रहात्। प्रधानभूतशब्दार्थपरित्यागो वकल्प्यते। कर्तृरूपस्य चैकोपि तदधिष्ठानभेदतः पुंस्त्वं
द्विवचनं यद्दृश्यते सोमोहि दृश्यते। अप्राप्तत्वात्तु वसने परा क्षौमं विधीयते। वसानावादधीयातामित्येतावत्तु वादकौ। अनु

वाद्रोपयामासिसा च स्त्री पुंसयोर्द्वयोः। तेन प्राप्तिवशाद्द्वाविमौ तावेव वक्षतः। एक एव पुमांस्तस्मादादधीत सहस्त्रिया उ
त्सर्जिवाक्येत्येकत्वमुपादेयं विवक्षितं। तस्मायावडत्नमाशी ब्रह्मचर्यमतुल्यत्वात्। दंपत्योः सहप्रयोगः स्थितस्तत्र पत्न्येवेक्ष
तद्दस्यादिषु पत्न्येव कर्त्री। यजमानोन्वारभत इत्यादिषु च उपादेयस्य यजमानस्य विवक्षितत्वात् पुमानेव कर्ता। ये तु फलिसं।
स्थाएवचनेनापि न व्यवस्थापितास्ते द्वयोरपि फलित्वाद्वा वर्तते। अतो न तेषु चिंता। यानि तु परार्थान्यपस्थानानुमंत्रणादी
नि यजमानसमाख्यया यजमानकर्तृकाणि तेषु किं दंपत्योरन्यतरः कर्ता उत पुमानेवेति चिंत्यते। तत्र याजमानसमाख्यानं
यजमानपरा यथा। निष्पद्यते तथैवैतत् यजमानापरादापि तेन समाख्यानाविशेषाद्विशिष्टं द्वयोरपि कर्तृत्वं। विद्वत्त्वात्तु पु
मानेव कुर्यात्स्त्रिवेदप्रीतरणविराध्ययनश्रूयत्वात् प्रतिषिद्धं हि तत्स्त्रियाः। यद्यप्युपनयनमष्टवर्षस्य संस्कार्यत्वेनाविवक्षित
लिंगत्वात्स्त्रिया अपि भासते अत एवाध्ययनमप्यनिर्दिष्टकर्तृकत्वात् प्रकृतमुपनीतं कर्तारमाश्रयतस्त्रिया अपि
स्यादित्यधिकारबुद्धिर्भवति। तथाप्याथाहत्य स्त्रीणामध्ययनप्रतिषेधाद्विद्वत्त्री स्त्री न शक्ता मंत्रोच्चारणं कर्तुं। न च तर

न्या॰
६
6

स्यथानुपपत्त्या तस्या अपि विद्वत्तासंपादयितुं शक्यते। संपन्नविधेन पुंसा तेषामनुष्ठानसिद्धेः। अतः पुमानेव कर्त्ता। चातुर्वर्ण्य
मविशेषात्। किं कामश्रुतिप्रयुक्तं विद्यार्जनं उत स्वाध्यायविधिसिद्धविद्योपजीविन्यः कामश्रुतय इति। द्विधा चात्र पूर्वः प
क्षः एकस्तावत् स्वाध्यायाध्ययनेनार्थानुष्ठानज्ञानोपयिकतया विहितक्रत्वंगं क्रत्वंगं क्रतुविधिभिरेव प्रयाजादिवत् प्रयुंज
ते। क्रतवश्चाविशेषेण चातुर्वर्ण्यमधिकुर्वाणाश्चतुर्णामध्ययनं प्रयुंजते। तत्र त्रयाणां वसंते ब्राह्मणमुपनयीतेत्यादि
भिरूपनयनसंस्कारोऽध्ययनांगत्वेन विहितः चतुर्थस्य तु विध्यभावादनुपनीत एवाधीत्य विद्यां लब्ध्वाधिक्रियत इति। द्वितीय
स्तु न क्रत्वंगमध्ययनं श्रुत्याद्यभावादक्षरग्रहणादिरूपकार्यपरंपरया वा वाक्यार्थज्ञानं यावद् दृष्टं ज्ञानस्यानुष्ठानोपयिकत्वेन
स्वयमेव फलत्वोपपत्तेस्तत्रैवाध्ययनं स्वविधिनापि नियुज्यते न तद्द्वारेण क्रतौ तेनाध्ययनमाधानमिवाग्न्यर्थं ज्ञानांगं तत्क्रत्वं
गं न्यातस्तेन विनापि क्रतूनामवैगुण्यादनधीतवेदशूद्रस्य उपदेशवचनादनुतिष्ठन्नधिक्रियते। क्रतवोऽत्वविशेषेण चतुर
ऽपि कुर्वाणास्त्रयाणामध्ययनविधिसिद्धविद्यत्वाद्विद्यार्जनं न प्रयुंजते। शूद्रस्य तत्र यतः सिद्धविद्यत्वाभावात्तदर्जनमपि प्र रम
६

पुंक्ते अतोयद्यपिस्वाध्यायविधिरनिर्दिष्टकर्तृकत्वात्कर्तारमपेक्षमाणः प्रकृतोपनयनसंस्कृतानेवसमर्थं वयमाचार्यसमी
पमानीत इत्येवं प्रजननमपेक्षमाणानग्न्याहरणादीनेवकर्तृत्वेन स्वीकुर्वंस्तेषामेवाध्ययनं विधत्ते न शूद्रस्य तथाप्यविहितेनै
वाध्ययनेनोपायांतरेण वा विद्यां लब्ध्वाधिक्रियेतेति। सत्यमध्ययनं नांगं तत्कृतत्वात्त्वंगमर्थधीः तदुक्तं क्रतवोलब्धानतुमर्स्या
क्षिपंतितां। क्रतुविधयोन्यथानुपपत्त्या विद्यामाक्षिपंति यदा तु स्वाध्यायाध्ययनोपात्तविद्यान्द्विजन्मनो लभंते तदा तैरेव
लब्धासानोऽनुपपत्तिस्स्यात्पान्न चतुर्थस्य विद्यामाक्षिपति यदा चैवं विहितोपायात्तद्विज्ञानवत एवविधयोऽधिकुर्वंति। तदात
देवज्ञानमकर्म्मकालोपात्तमपि अग्निवत्क्रतूनामंगमिति तच्छून्यस्य स्वाध्यायेन विद्यामर्जयतोपि न सिद्ध्यत्यधिकारः मंत्र
वत्सु चानधीनवेदस्य कुतोधिकारः कुतस्तरां चानग्नेरग्निसाध्येषु। तस्मात्त्रयाणामधिकारः। त्रयाणां द्रव्यसंपन्नः कर्मणो
द्रव्यसिद्धत्वात्॥ किं त्रयाणामपि मध्ये द्रव्यवत एवाधिकारः उताद्रव्योपि कर्मार्थेन द्रव्यमर्जयित्वानुतिष्ठन्नधिक्रियत इति
संशये पुरुषार्थोपात्तद्रव्यवतो लाभात्तद्द्रव्यस्य तदर्ज्जनं क्रतुभिराक्षिप्यते अतो विद्यामिवद्रव्यवतामधिकारः। नैत

श्रा० ७

तुल्यं विधाहि प्रत्यक्षविधिसिद्धात्रयाणामिति तैरेवोपपन्नाः। ऋतवो न भ्रष्टद्रव्यतामाक्षिपंतीति युक्तं। द्रव्यार्जनं न सर्वपुरुषा
णां द्रव्यकार्यैरेवाक्षेप्तव्यं। तत्राविशेषात् भोजनादिवत् ऋतूनामपि तदाक्षेपकत्वं न वार्यते। अतो द्रव्योपि द्रव्यमर्जयित्वा कुर्या
त्॥ ॥अंगहीनश्च तद्धर्मा॥ ॥अंगहीनोपि द्रव्यहीनवत् तत्स्थानिसमाधानेन तत् कुर्यात्। द्रव्यहानिर्बहिरंगमधिकारं विह
न्तीति विशेषाशंका। अथवा अद्रव्यवदंगहीनस्यासिद्धसेवाधिकारस्य तत्र विवक्षयानुवदतीत्यपुनरुक्तं॥ ॥उत्पत्तौ नित्य
संयोगात्॥ यस्य त्वप्रतिसमाधेयमंगवैकल्यं स न कथंचिच्छक्नोति कर्तुमिति न काम्ये अधिक्रियते। नित्ये पुत्वाहिनाग्निश्चे
यथाशक्ति कुर्वन्नधिक्रियत एव। अन्यार्षेयस्य हानं स्यात्॥ ॥दर्शपूर्णमासयोरार्षेयं वृणीत इति विधाय पुनः श्रुतं ए
कं वृणीते द्वौ वृणीते त्रीन् वृणीते न चतुरो वृणीते न पंचातिवृणीत इति तत्र विचारः। किं दर्शपूर्णमासयोरेकार्षेयद्व्यार्षेय
योरप्यधिकारः। उत त्र्यार्षेयस्यैवेति तत्रार्षेयस्यैवेति तत्रार्षेयं वृणीत इति वरणमात्रे विहिते चतुर्णां षडादीनां च प्रतिषे
धे कृते यथादिक्कस्त्रिपंचानां प्राप्तं वरणमिति तत्तु वरणमनुवादः। अथवार्षेयं वृणीत इति सामान्यं यथा त्रीन् वृणीत इत्य एम ७

सेविशेष्यते। तथैकं वृणीते द्वौ वृणीत इत्याभ्यामपि। विशेषाभावादुभयथापि द्वित्वैकत्वयोस्त्रित्वेनाविशेषादेकं द्वौ त्रीन् पंचवा
वृणानोधिक्रियेतेति प्राप्ते ब्रूमः। असंख्याकविधौ तावत्प्रतिषेधद्वयाश्रयात्। वाक्यद्वयं प्रसज्येत त्रीनित्येतच्चपाक्षिकं। एक
द्वित्रिविधानं चेत्ततो वाक्यत्रयं भवेत् विकल्पश्च भवेत्तस्मात्त्रित्वमेव विधीयते। एकं वृणीत इत्यादौ विध्यश्रवणादर्थवादेन विधिः कल्प्यः
तत्र यदि त्रिवरणमात्रे विहिते चतुर्णां षडादीनां च प्रतिषेधः स्यात् ततः प्रतिषेधद्वयाश्रयणात् वाक्यद्वयं कल्प्यं स्यात्। तदेकादिष
से च त्रयाणामभावात् त्रीनिति नित्यवत् श्रवणमुपरुध्येत। अथैकादिभिः सर्वैर्विशिष्येत तथापि संख्यात्रयविधायकं वाक्य
त्रयं कल्प्यं त्रित्वस्य च पाक्षिकत्वं तदवस्थमेव त्रित्वमात्रविधौ त्वेकार्थविधानादेकवाक्यत्वं तदन्तर्गतत्वाच्च द्वित्वैकत्वश्रवणं
नित्यानुवादः चतुरादिप्रतिषेधश्चानुवाद एव तस्मात् त्रित्वविशिष्टवरणविधानात् उपसंहारः तत्समर्थस्यैवाधिकारः। वचनाद्रथ
कारस्याधानस्यासर्वशेषत्वात्। वसंते ब्राह्मणोऽग्निमादधीत ग्रीष्मे राजन्यः शरदि वैश्य इति विधाय श्रूयते वर्षासु रथकार आ
दधीतेति तत् किं ब्राह्मणादीनामेव रथकरणे निमित्ते वर्षाविधिर्यउत रथकारसंज्ञकस्यावान्तरवर्णस्याधानान्तरविधानमिति

शा०
८
4

संशये। द्विजातीनां विद्वत्त्वात् कालमात्रविधाने च लाघवात् तेषामेव कालविधिनाऽविदुषोऽवांतरवर्णस्याविशिष्टाधानविधिरिति
प्राप्ते रूढिबलेन योगबाधात् वचनबलाच्चाविदुषोऽप्यधिकारप्रतीतेरविघातादृभूणां त्वेति च मंत्रवर्णादृभुसौधन्वनपर्या
यस्यावांतरवर्णस्य रथकारस्येदमाधानं विधीयते। स्थपतिर्निषादः स्याच्छब्दसामर्थ्यात्। रौद्रं वास्तुमयं चरुं निर्वपेदिति प्रकृ
त्यश्रुतं एतया निषादस्थपतिं याजयेदिति। तत्र संशयः किं द्विजातिरेव यो निषादानामाधिपत्यं करोति तस्यात्राधिकारः
षष्ठीसमास एवायं। उत निषाद एव स्थपतिस्तस्य कर्मधारयश्चायमिति। तत्र पक्षद्वयेऽपि शङ्कोयं योगादेवमुक्ते तत्र षष्ठी
समासत्वे विशेषः स्यादधिक्रिया। आहिताग्नेश्च यदि तु कर्मधारयः स्यात्ते। अनाहिताग्नेरस्य प्रसज्येताधिकारिता। तेन ष
ष्ठीसमासोऽयमिति प्राप्तेऽभिधीयते। निषादपरमेवं तु स्थपतौ लक्षणां व्रजेत्। न हि षष्ठी श्रुता येन तत्संबंधि विधिर्भवेत्। नि
षादपरमेवातः षष्ठ्यर्थं लक्षयेदिदं। कर्म्मधारयपक्षे तु न काचिदपि लक्षणा। निषाद एव स्थपतिरतः श्रुत्या प्रतीयते। तेन श्रुति
बलादसौ नाहिताग्निश्च सन्नपि। निषाद एव स्थपतिः कर्मण्यत्राधिकारभाक्॥ ॥इति शास्त्रदीपिकायां षष्ठस्याध्या

एम
८

यस्य प्रथमः पादः ॥ ॥ पुरुषार्थैकसिद्धत्वात्तस्य तस्याधिकारः स्यात्। अनेककर्तृकेषु कर्मसु ऋद्धिकामाः सत्रमासीरन्नित्या-
दिषु किमेकैकस्य कृत्स्नं फलं भवति ततश्च प्रत्येकं कृत्स्नफलकामानामधिकारः। उत समुदायस्य कृत्स्नं फलं प्रत्येकं तु फलाव-
यवः ततश्च फलावयवकामानामधिकार इति संशयः। तत्र समुदायस्य कर्तृत्वात् तस्य कृत्स्नफलान्वयः। फलावयवयोगः
स्यात् प्रत्येकं समुदायिनां। यद्यपि कामयेदेव कृत्स्नमुद्दिश्य गतत्वादविवक्षितमिति कामिनः प्रधानभूतानुद्दिश्य गुणत्वेन
विधीयमानं कर्म प्रति प्रधानावृत्तेरेकैकस्यैव तस्य फलं साधयतीति भाति तथाप्याख्यातोपात्तस्य कर्तृबहुत्वस्य उपात्तेनाधिक-
रणन्यायेन विवक्षितत्वात् संहत्य कामिभिः कर्तव्यं। न चैकस्मिन् कर्मणि बहूनां प्रत्येकं कर्तृत्वं संभवति। एकेन कृते परस्य कर्तृ-
त्वायोगात्। अतः समुच्चितानां व्यासज्य कर्तृत्वं कर्तृगामि च फलं अतस्तदपि समुदायस्यैव। तं देशं तु समुदायिनः प्राप्नुवन्तीति अ-
वयवकामिनामधिकार इति प्राप्तेऽभिधीयते। समुदायस्य कर्तृत्वं यद्यपि स्यात्तथापि तु प्रत्येकमधिकारित्वात्तथैव फलमाप्नुयुः। यथ-
थावगम्यते तत्तथैवाङ्गीकर्तव्यं। इह चाधिकारावस्थायां साहित्यस्याविवक्षितत्वात् प्रत्येकमधिकारः प्रतीयते कर्तृत्वं च संहितानां

श्रा० मतः संहृत्यप्रयुक्तंकर्मप्रत्येकंफलंसाधयतीत्यभ्युपगंतव्यं।नचैवमत्वंतावत्कर्तृगामित्वंतेषेवव्यासज्यवृत्तिकर्तृत्वंप्रत्येकवृत्तिफल
६ मितिप्रकारभेदमात्रं।कर्तृत्वमपिचैतेषांप्रत्येकमवगम्यते।कर्तृगामिबहुत्वंहिद्रव्यगाम्यन्यथाभवेत्।कर्तृबहुत्वंसाक्षादभिधी
यते।नकर्त्राश्रिपद्रव्यबहुत्वंव्यासज्यवृत्तिनिचकर्तृत्वेनकर्तृणांबहुत्वंस्यात्।किंतुद्रव्यमात्रस्यतत्रकर्तृबहुत्वाभिधानमसमंजसं
स्यात्।संभवतिचसर्वेषांप्रत्येकंयुगपत्कर्तृत्वं।पर्यायेहिविरोधःस्यात्।एकेनकृतेऽपरस्यकर्तृत्वायोगात्नयौगपद्येनतस्मा
त्प्रत्येकमधिकारः।प्रयोगेपुरुषश्रुतेःयथाकामिप्रयोगेस्यात्।दर्शपूर्णमासादिषुकिमेकोद्वौबहवोवाकर्तारः।उतएकएवे
तिसंशयः।तदर्थंचकिमाख्यातोपात्तावक्तृसंख्याविवक्षितानेतिचिंत्यते।तत्रफलार्थिनंसमुद्दिश्यकर्मणामुपदेशनात्।उद्दे
श्यगामिनीसंख्याग्रहवन्नविवक्षिता।स्यान्मतं।यद्यपिकामपदगतासंख्याउद्देश्यगतत्वात्तद्गतलिंगवत्ग्रहैकत्ववन्नाविव
क्षितातथाप्याख्यातोपात्तासंख्याविधेयसमानाभिधानक्रियाश्रितगुणभूतकर्तृगामित्वाद्विवक्षितेति।तदसत्।आविधेयत्वात्
क्रियापाः।यागेनस्वर्गमाप्नुयादित्येतावदुच्यतेनानुष्ठानंतदर्थप्राप्तं।स्वर्गप्राप्तौचपुंसःअप्रधानत्वादविवक्षितासंख्या।य एम ९

रित्स्वर्गं कुर्यादित्युच्यते तन्नातोन्योपि स्वर्गमात्रमुपात्तं न च नैव। यद्यपि स्वर्गं कुर्यादित्युच्यते। तथाप्यविधेयैव क्रिया यो हि यदिच्छति स तत्करोतीत्येवं फलकामस्य फलविषया क्रिया प्राप्तैव तां प्रत्ययेनानूद्य प्रकृत्यर्थो यागादिः करणतया विधीयते। प्रत्ययार्थश्च कर्तृसंख्यातेनासावनुवाद्यगतत्वाद्विवक्षितान्त्येकेन प्रत्ययेन फलकामस्य रागप्राप्तां फलभावनामुद्दिश्य ताकर्तृसंख्याभावनां यागं वा प्रत्युपादातुं शक्यते। वैरूप्यप्रसंगात्। अथ तं। यद्यपि यागानवरक्ता फलक्रिया प्राप्तैव तथापि यागक्रियायाः प्राप्तत्वेन विधेयत्वात्तद्विशेषणभूता संख्या विधेयगतत्वाद्विवक्षितेति। तदयुक्तं। यद्यपि यागानुरक्ता क्रियान प्राप्ता तथापि क्रियास्वरूपं तावत्प्राप्तमेव तत्र विशिष्टक्रियाविषयोपि विधिः श्रूयमाणः प्राप्ताप्राप्तविवेकेन यागानुरागमात्रपरो भवति न हि फलक्रियातः क्रियान्तरं यागेनानुरज्यते। सा च तत्प्राप्तैव तद्विशेषणं च संख्या न साक्षाद्यागगता प्रत्ययार्थत्वात्तस्माद्विवक्षितेति। अत्राभिधीयते। रागप्राप्तात्फलप्राप्तिर्न साशब्देन बोध्यते। प्रत्ययश्च क्रियावाचीन प्राप्तिं प्रतिपादयेत्। उपग्रहविशेषाच्चनाकर्तुः फलसंगतिः। विधेश्चैवमतोन्यस्य न फलप्राप्तिसंभवः। स्वर्गादिकाममुद्दिश्य क्रियैव हि विधीयते। यागादियुक्ता।

स्वा० १९ संख्याचतद्गतत्वाद्विवक्षिता। फलक्रियानियोगेननहिपुंसां फलार्थिनां। एवमाम्नायतश्चैषा शब्देननविधीयते। अर्थिपदेनता
वदर्थितामात्रमुच्यतेनप्रवृत्तिराख्यातमपिपर्युदास्य। एवं धात्वर्थयागादिविशिष्टभावनाविधिपरमेवस्वरसादवगम्यते।न
तश्चयः स्वर्गोमेस्यादित्येवंकामयते सतंयागेनभावयेदितिभावनेवसर्वविशेषणविशिष्टा फलोपायत्वेनकामिनोविधीयते।
नचावश्यमर्थितस्तद्विषयाप्रवृत्तिः आम्नायेनबलान्नतउनार्थविधिपर्यागानुरागमात्रपरत्वेनैवव्यवस्थाप्यतेनच फलकामः
मान्यवचनादिदंजानातिप्रवृत्तस्यमेस्वर्गःसिध्यतिनत्वप्रवृत्तस्यदैवात्कारणांतराद्वेतितदज्ञानात्स्वर्गप्राप्तिमभिलषन्त
द्विषयप्रवृत्त्यप्रवृत्त्योर्मध्यस्थउदास्ते। यदातुवचनमस्ययागादिविशिष्टंव्यापारंविधत्तेतदानस्येप्सितोपायतांविधिप्रामाण्याद
वगम्यतत्रप्रवर्तते। ता तस्माद्विधेयैवभावनायागादिविशिष्टासंख्याचनहिविशेषणमितिविवक्षितैवंलिंगंतुकामपदगत
मुद्देश्यविशेषणत्वादविवक्षितमितिविशेषः। एतत्स्वर्गकामस्यानुष्ठानमनेनयागस्तस्योपायत्वेनविधीयते। वदेवासोमयै रत्न
वेतितत्कर्तव्यमितिस्वयमेवहिजानंतिकर्तव्यंपुरुषाःसदेत्यादिभाष्यवार्तिकयथाश्रुतग्रहणात्भावनायाअविधानमा १९

कृःतेषामनूद्यमानविशेषणस्याविवक्षितत्वादिदमधिकरणंविरुध्यते।सर्ववाक्येषुचक्रियामविधायगुणमात्रविधानाच्चोदिते
ह्रितदर्थत्वात्तस्यतस्योपदिश्यतेत्येवमनेकगुणविधानंक्वचिदपिनस्यात्ततश्चरेवतीषुवारवंतीयंकृत्वापशुकामोयजेतेत्यादि
षुप्राप्तभावनोद्देशेनयागस्यरेवतीवारवंतीयसंबंधस्यचविधानाद्गुणविधिपक्षवत्वाक्यभेदःस्यात्नचयागविशेषणत्वंगु
णानांयेनतस्यैकस्यविशिष्टस्यविधानाद्वाक्यभेदःपरिह्रियेत।सर्वेषांभावनागामित्वात्।यथोक्तंधात्वर्थकारकाणामङ्गे
कहायन्यादिवत्परस्परेणासंबंधभावनासंबद्धानामुत्तरकालंपरस्परोपकारित्वमितिसप्तमनवमाघेपोर्वक्ष्यतीति।तस्मा
द्भावनाविधिकृतमेवानेकगुणविधानंप्रसक्तं।तच्चाधिकरणंसमर्थनीयं।यथाहुः।यदाहिभावनारूढंविधित्वंभावनार्थत्वेनैवग
म्यते।तदार्थाद्विशेषणविधौसत्यवाक्यभेदः।यदातुतद्विशेषणार्थंतदानेकविशेषणयोगेसतिपदर्थंविधित्वंतस्यैवैकस्यवि
धानंनेतरस्येतिवाक्यभेदःस्यादिति।सत्यंचेदमुच्यतेसर्वत्रभावनाविध्यभिधानात्तस्माद्देवासोमयैवेनतत्कर्तव्यंस्वयमेवहि
ज्ञानंतिकर्तव्यंपुरुषाःसदेसादिभाव्यस्वरूपप्राप्तिमभिप्रायंनभावनाभिप्रायमितिव्याख्येयं।अतोभावनापाविधेयत्वात्त

न्या० द्विरोपणभूता कृर्त्तसंख्योपादेपगतत्वाद्विवक्षितेति सिद्धं॥ ॥प्रक्रमात्तु नियम्येतारंभस्यात्क्रियानिमित्तत्वात्। काम्यं कर्मकामार्थेन
११ प्रक्रान्तं वीतायां फलेच्छायामवाप्ते वा फले किं नियोगतः समापनीयं न वेति चिंत्यते। तत्राभीप्सितसिद्ध्यर्थं साधनेषु प्रवर्त्तते।
सिद्धे तस्मिंस्तदिच्छायां वीतायां किं प्रवर्त्तते। परिसमाप्येत न फलार्थं कर्म्म किंतु फलकामनायां निमित्ते कर्म्मैव कर्त्तव्यं तस्याहि भा
व्यतापरस्त्रस्त्यावगम्यते वाक्यात्कामस्यात्तच्छब्दलिंगं चोपक्रममात्रेण चोदितं कृतं भवति। समाप्तेः शास्त्रार्थत्वात् न च पू
र्वाधिकरणोक्तरीत्या नित्यानित्यसंयोगविरोधः काम्यानां नित्यत्वाभावादतः कामे निष्पन्ने निरृत्तेपि वा तन्निमित्तं कर्मकर्त्त
व्यमिति। नैतदेवं नत्य पुरुषार्थं कर्म्म भाव्यं भवतीत्युक्तं। न च फलान्तरं कल्पयितुं शक्यं श्रुतहान्यश्रुतकल्पनयोरन्याय्यत्वान्न हि
श्वविगर्हणं तत्र तत्वादनिमित्तं न च परमार्थतोन्यतमस्ति। शास्त्रार्थस्य संकल्पितत्वात्। निवृत्तायां च कामनायामशास्त्रा
र्थत्वात्तस्मादसमापनीयमिति प्राप्ते ब्रूमः। न हि संभावनामात्रात् भ्रान्तिः कल्पयितुं क्षमा। सर्वस्मृतिश्रुतितुल्यत्वादप्रामाण्यप्रसं
जनात्। तथा च निरवचनं प्रायश्चित्तं च श्रूयते। तस्मात्प्रक्रान्तमुपक्रान्तं नियोगेन समापयेत्। नैतिरीया हि समामनंति देवताभ्यो एम ११

वा एष आवृश्च्यते यो यस्य दैवत्यान्यजते त्रेधा तद्वी येन यजेत न देवताभ्य आवृश्च्यत इति॥ ॥लोके कर्माणि वेदवत्ततोधि
पुरुषज्ञानं। रथगरतकर्म्मादि प्रक्रांतं किमवश्यं समाप्यं नेति संशये तेषामपि शास्त्रीयत्वाद्विहितमुपक्रांतं नियमेन समाप
नीयमिति श्रुतिकल्पनात् देवताभ्यो वा एष आवृश्च्यत इति। देवताश्रयत्वाद्यागमात्रस्यावश्यसमापनीयत्वावगमात् रथकारादी
नामपि प्रक्रांतानामावश्यकं समापनमिति प्राप्ते ऽभिधीयते। अशास्त्रार्थत्वाद्धि प्राप्ति दृष्टार्थे युगरथादिषु तेन शास्त्रं न कल्प्य
ते पुरुषार्था हि देवता। पुरुषार्था हि देवता रथप्रदेशेषु निवेश्यते न तु रथकर्म्मदेवताश्रयं तस्मान्नानियमः। प्रतिषेधेष्वकर्म
त्वात्तत्क्रियास्यात् प्रतिषिद्धानां विभक्तत्वादकर्मणां। न कलंजं भक्षयेदित्येवमादिषु संशयः। किं प्रजापतिव्रतवत् पर्युदासाश्र
यणेनाभक्षणभावसंकल्पः कल्प्यफलो विश्वजिदादिवद्विधीयते उत भक्षणं प्रतिषिध्यते प्रत्यवायपरिहारायेति परिनञ्
विशिष्टं भक्षणं विधिना संबध्यते ततः पर्युदासः। अथ नञ्विध्योः संबंधः ततः प्रतिषेधः॥ तत्र भक्षणस्य प्रधानेन नञ्
विध्योर्नास्ति संगतिः भक्षणं तु नञा युक्तमव्ययत्वात् विधीयते श्रुत्या विधिसंबंधो भक्षणस्य नञः पुनः। पदांतरत्वाद्वा

शा॰ क्येनश्रुतेर्वाक्यंचदुर्बलं।तस्माद्भक्षणमेवेहनञायुक्तंविधीयते।ननथ्यभक्षणाभावो।ननुष्ठेयत्वादविधेयइतिनहेतुःसंकल्पोवि
१२ धीयतेसचाश्रुतफलःकल्प्येनफलेनसंबध्यतेअतःफलकामाधिकारमेवंजातीयकमितिनिषिद्धकामाणांयाथाकाम्यं॥अत्रो
12 च्यते।नञ्भक्षयत्योरेवंनुस्वार्थहानिःप्रसज्यते।संकल्पलक्षणात्तत्रश्रुतेरत्यंतबाधनं।मत्पक्षेपुनःप्रत्यासत्तिमात्रबाधनं
नवातरपिकिंतर्हिभक्षयेत्याहितिपदंपरिपूर्णनञासंबध्यतेभक्षयेन्नेतिभक्षयेदितिचभक्षणभावनायांप्रवर्तनागम्यतेनञासं
बंधेनविधिनातद्विपरीतनिवर्तनाप्रतीतिः।निवर्तनाचनिवृत्तिफलोव्यापारः।नचप्रेक्षापूर्वकारीपुरुषःरागतःप्रवर्तमानो
ऽसतिप्रत्यवायफलत्वेनिवर्तयितुंशक्यतेइतिश्रुतनिवर्तनान्यथानुपपत्याविषयीभूतभक्षणव्यापारस्यप्रत्यवायफल
त्वंकल्प्यते।अतस्तस्मिन्हाएयस्ततेषामेवंजातीयकंवर्जयितव्यं।एतन्नञर्थविषयस्यनियोगस्यभक्षणप्रवृत्तस्यनियोज्यस्य
चलब्धत्वान्नप्रत्यवायकल्पनाप्रमाणवतीयादृक्त्वेश्रुतार्थापत्तेःप्रमाणत्वोपपादनान्निरस्ताः।किंचभक्षणंनञर्थवि एम
शेषणत्वेनोपक्षीणंननियोज्यविशेषणमाख्यातेनतुर्यविशेषणत्वंनाभिधानात्।उभयविशेषणत्वेचावृत्तिप्रसंगात्।न १२

ननु न ब्रूमः अत्या नियोज्यज अर्थविशेषणस्यैवार्थान्नियोज्यविशेषणतामाचक्ष्महे। भक्षणप्रवृत्त एव हि तदभावे नियोक्तुं शक्यते
नान्यः। सत्यमेवं तथापि न नियोज्यविशेषणत्वे भक्षणस्य प्रमाणमस्ति परिशेषेतावत्तैव नियोज्यविशेषणत्वमाश्रीयते त
तः सर्वत्र जीवनं शक्तिश्च नियोज्यविशेषणं स्यातां ततश्चातदवच्छिन्नस्य नियोज्यस्यालब्धत्वाद्विश्वजिदादौ स्वर्गकामादेरक
ल्पनं स्यात्। तत्र परिकिंचित्केन चिदुच्यते प्रयुक्तिलाघवाय फलकल्पनमिति तन्निषेधाधिकारेष्वपि समानमित्यास्तां तावत्॥
तस्मिंस्तु शिष्यमाणानि जननेन प्रवर्तेरन्॥ स्मार्तयमनियमाः प्रागस्तो भुंजीत उदङ्मुखो मूत्रं कुर्यादित्येवमादयः। किं जननप्र
भृति प्रवर्तन्ते जातो यदा शक्नुयात् तदेत्यर्थः। उतोपनयनप्रभृतीति संशये। अनग्निसाध्यत्वादमन्त्रसाध्यत्वाच्चैषां शक्तमात्रा
धिकारत्वे प्राप्ते ब्रूमः। उपनयनप्रभृति स्युरिति। कुतः स्मरणात् स्मरंति हि उपनयनादिर्नियम इति तस्मादुपनीताधिकारः। अभ्या
सो वा कर्मशेषत्वात्पुरुषार्थो विधीयते। यावज्जीवमग्निहोत्रं जुहोति यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति श्रूयते। तत्र संश
यः। किं सातत्येनानुष्ठानं उत सायं प्रातरग्निहोत्रं पौर्णमास्यमावास्ययोश्च दर्शपूर्णमासाविति संशयः। तत्र जीवने निमित्ते क

ग्रा० म्नविधानात्त्रेमिनिके चासंभावितांगत्यागे प्यवैगुण्यात् कालस्य चांगत्वात् तत्क्लोपेन संततानुष्ठानं न्याय्यमिति प्राप्ते ब्रूमः।
१३ अंगत्वेपि च कालस्य न त्यागोन्यांगवत् कुतः। अनुपादेयरूपत्वात् तस्मिन् वर्म विधिर्यतः। यद्धि प्रयोगविधिवशादुपादेयं
13 तद्धि यथाशक्ति इति उपबध्यते कालस्य पुनरनुपादेयत्वादेषा हि तत्र वचनव्यक्तिः अस्मिन्काले प्राप्ते कर्म कर्तव्यमिति तत
श्चार्थात्तत्कालमेव जीवनं निमित्तं भावनीति न कालांतरेनुष्ठानमित्येतेनाग्नि विद्याख्याते तयोरप्यध्ययनाधानविधिसि
द्धयोः स्वीकरणात् प्रयोगविधिनाननुष्ठाप्यत्वादेषा वचनव्यक्तिरग्नि मान्विद्वान् चाधिक्रियेतेति प्रत्यक्षमेव च विद्यावतो धि
कारश्च वर्णयुग्म एवं विद्वानग्निहोत्रमित्येवं सर्वत्र श्रवणात् तस्मात्काले प्राप्ते विदुषोग्निमतश्चांगांतराणि यथासंभवमुप
संहृत्यानुष्ठानं। तेषामौत्पत्तिकत्वाद्रागमेन प्रवर्तेरन्। यदि कालशास्त्रानुरोधेन निमित्तसंकोचः ततः कालशास्त्रस्य
सकृदनुष्ठानेन संपादितत्वात् दृशेन सकृदेव सायं प्रातः कालयोः पौर्णमास्यमावास्ययोश्च कृतः शास्त्रार्थ इति न पुनःपुन
पुनरनुष्ठानं स्यात्। नैवं। न हि कालवशाज्जीवनस्य निमित्तत्वं हीयते किं तु तत्कालीनमेव वनं निमित्तं न कालांतरीयमित्ये राम १३

तावत्। ततश्च तादृशस्यैव जीवनस्य पुनः पुनरावृत्तौ शास्त्रमपि पुनः पुनर्नैमित्तिकेषु पुरुषं नियुंक्ते। अतो निमित्तावृत्तावावृत्तिर्नैमि
त्तिकानां। तथान्तःक्रतुसंयुक्तानि। पुंसंयुक्तं पुरुषार्थेषु नैमित्तिकेषु निमित्तावृत्तावावृत्तिरिति। तत्र हि प्रत्यावृत्ति फलमन्यदन्यच्च निष्पद्य
ते। क्रत्वर्थेषु तु भेदनहोमादिषु क्रतूपकारस्यैव साध्यत्वात् सकृत्कृतेनैव तत्सिद्धेरेकस्मिन् प्रयोगे भेदनावृत्तावपि न होमावृत्ति
रिति विशेषं मन्यमानस्योत्तरं। क्रत्वर्थेष्वपि शास्त्रेण निमित्तावृत्तावावश्यकगमात् आवृत्तौ निमित्तस्यावृत्तेनैव होमेन सगुणः
क्रतुः सफलापवर्गो भवतीति कल्पनात् एषामपि निमित्तावृत्तावावृत्तिः। आचाराद्गृह्यमाणेषु तथा स्यात्पुरुषार्थत्वात्॥ ॥गु
र्वनुगमनादीनामाचर्यमाणानां गुरुगमनादिनिमित्तानां किं निमित्तावृत्तावृत्तिः स्यान्नेति संदेहः। तत्र दृष्टार्थस्थिते। अनु
गमनाभ्युपस्थानाभिवादनादिभिः प्रीतो गुरुः सम्यग्विद्यां दास्यतीति। तत्र यथानुष्ठिते प्रीतिर्भवति तथा कर्तव्यं सकृदसकृद्वा
न त्वत्र प्रमावर्तनीयमिति प्राप्तेऽभिधीयते। दृष्टार्थेष्वपि नियमादृष्टाभ्युपगमात्तस्य च शास्त्रप्रमाणकत्वात्तद्दृशेन निमित्ता
वृत्तावावृत्तिः। ब्रह्मणस्य सोमविद्याप्रजमृणवाक्येन संयोगात्। सोमेन यजेत स्वाध्यायमधीयीत प्रजामुत्पादयेदिति श्रु

श्रा० तंसोमविद्याप्रजंकिंनित्यमुतानित्यमितिसंशयः।तत्रयावज्जीवादिवत्तुल्यनिर्देशाभावाज्ज्योतिष्टोमेनस्वर्गकामोयजेतेतिचफलश्र
१४ वणाद्वसंतेवसंतेज्योतिषायजेतेतिचास्यकालविधिपरत्वादध्ययनप्रजयोस्तु विश्वजिद्वत्स्वर्गकल्पनात्तत्समेब्रह्मवर्चसि।
कामस्येवमारीनांचोपनयनगतानांफलानामुपनयनस्याध्ययनांगत्वेनस्वयंफलानपेक्षत्वादध्ययनफलत्वमेवन्याय्यं।अतः
फलकामाधिकारत्वमेवाभिनिधानेभिधीयते।नित्यानीति।कुतः।वीप्सायुक्तोवसंतोहिनिमित्तत्वेनगम्यते।यावद्वसंतंनि
यमःसोमस्यातोवगम्यते।यावद्वसंतमभ्यासःकाम्यस्यैवाथनोयते।यजेतेतिपदेनैवंप्राप्तोभ्यासलक्षणात्तस्माद्वसंतेनिमि
त्तविधानादागतआगतेवसंतेनियमेनसोमःकर्त्तव्यइतिनित्यः।अध्ययनमप्यश्रुतफलमक्षरग्रहणादिनाक्रमेणधर्माधर्मावि
बोधफलत्वात्तस्यचावश्यकत्वादावश्यकंब्रह्मवर्चसादिकंत्वध्ययनांगभूतोपनयनाश्रितसप्तमवर्षादिगुणफलत्वादध्ययनफ
लमनाशंकनीयमेव।प्रजोत्पादनमप्यनृणत्वफलश्रवणादनुत्पादयतथासुतानधोगच्छतीतिप्रत्यवायस्मरणादावश्यकमेव।
तस्मान्नित्यमेवसोमविद्याप्रजंकरणश्रुतिरपिसोमादीनामावश्यकत्वंदर्शयति।नचतत्रब्राह्मणाश्रवणात्तद्विषयमेवाव राम १४

ऽपकत्वं विधिवाक्ये पुनर्विशेषाश्रवणात् ब्राह्मणग्रहणस्योपलक्षणार्थत्वात् त्रयाणामप्यावश्यकाः सोमादयः। इति षष्ठस्य द्वि
तीयः पादः॥ ॥सर्वशक्तौ प्रवृत्तिः स्यात् तथाभूतोपदेशात्॥ ॥यावज्जीवमग्निहोत्रं जुहुयात्। यावज्जीवं दर्शपूर्णमासाभ्यां
यजेत वसंते वसंते ज्योतिषा यजेतेति। किमत्र सर्वांगोपसंहारेणैवाधिकारः। उत यदा यावंति शक्नोत्युपसंहर्तुं तदा तावद्भि
रुपेतं प्रधानं कुर्वन्नधिक्रियेतेति संशयः। तत्र समुच्चितानामंगानामित्थंभावेन संग्रहः। सर्वांगयुक्तमेवातः प्रधानं फल
साधनं। न चाफलसाधनेऽधिकारोऽस्तीति अतो न हीनांगस्य प्रयोगः। उच्यते। नैमित्तिकं नियोगेन कर्तव्यमवगम्यते। निमि
त्तेन ततोऽशक्तहानेनापि प्रयुज्यते। यावज्जीवपदं हि जीवनं धातुसंबंधविहितेन णमुल्प्रत्ययेन संबंधांतरासंभवान्नि
मित्तत्वेन प्रयोगानुरक्तां भावनां प्रत्यवगम्यते। दर्शपूर्णमासशब्दविशेषितश्च यजिः कालयोगिनामाग्नेयादीनामेव वाचको नां
गानामिति। निमित्तस्य चैतद्रूपं यत्तस्मिन्सति नैमित्तिकमवश्यं कर्तव्यं। अतः प्रधानानुरक्ताभावना स्ववाक्यश्रुता निमित्तव
शात्तावश्यकत्वानुरोधेन यथासंभवमंगानि गृह्णाति। तावतैव च शास्त्रवशात् फलसिद्धिरिति यथाशक्ति प्रयोगेयो

श्रा० नाधिकारः। स चायं न्यायस्तंत्ररत्ने न्यायरत्नमालायां च प्रपंचितः। तीर्थांतरं च निराकृतमित्युपरम्यते ॥ काम्येषु चैवमर्थित्वात् ॥
१५ ॥ काम्यानि कर्माण्यैंद्राग्नमेकादशकपालं निर्वपेदित्यादीन्युदाहरणं प्रकृतावपि काम्यप्रयोग उदाहरणमेव तत्रापि किं यथा
15 शक्तिप्रयोगेणाप्यधिकारः उत सर्वांगोपसंहारेणैवेति विचारः। अधिकरणोपजनितांगलोपकालुष्यबुद्धिः काम्येष्वपि
लापं मन्यते अतो वाच्यते ॥ ॥ प्रजाकामादिशब्दाः समर्थेष्वविरुद्धाः न च काम्यमानानिमित्ते येनावश्यकत्वं शास्त्रं स्यात्। अंगा
नि तु शास्त्राणि न शक्यंते बाधितुं नैमित्तिके पुनस्त्वासत्यपि निमित्ते प्रजाकामादिशब्दैरविशेषप्रतीतेः समर्थानामप्यधिका
र इति स्थितेपि तिर्यगधिकरणे पूर्वानः शास्त्रमावश्यकत्वं प्रधानस्येति तदविरोधेनांगानि यथाशक्ति गम्यंत इति विशेषः ॥ ॥
क्रियाणामाश्रयत्वात् द्रव्यांतरे विभागः स्यात्। अतः परमतिप्रसंगनिराकरणेन नैमित्तिके स्थापितस्य यथाशक्तिप्रयोग
स्य शेषत्वेन प्रतिनिधिविचाराः प्रस्तोष्यंते। तद्रूपो ह्यातत्वेन तत्त्विदं चिंत्यते किं दर्शपूर्णमासादिषु नीवारादिद्रव्यांतरं
क्रियमाणं कर्मांतरत्वमापादयति। उत द्रव्यांतरेपि तदेव कर्मेति। पयन्यत्र तान प्रतिनिधिरत्यत्र देवतदाद्रव्यांतरं प्रति राम १५

निधायप्रयोक्तव्यं कर्मतन्त्रात् द्रव्यस्यैवक्रियानामरूपंनार्थान्तरंततः॥तद्दाम्नमश्चतम्देदेनभवेद्भिन्नताकथं।उच्यते।त
द्दाम्नेपित्वस्येवव्यतिरेकः क्रियानपि।जातिवद्गुणवच्चातस्तम्देपिमभिधने॥क्रियापिजात्यादिवद्द्रव्यरतादिभेदेपिचतुर्लेयजतिर
र्शपूर्णमासावनुतिष्ठनीत्येवमेकबुद्धिवेदनीयानभेदंप्रतिपद्यतेनत्वत्वंताभिन्नत्वंद्रव्यान्तक्रियायाः येनतम्देदाम्देदः।स्यात्भेदा
पित्वस्येवानेकांताभ्युपगमात्अतोद्रव्यांतरेपिक्रियाभेदाभावात्सिद्धःप्रतिनिधिः।श्रुतिप्रमाणत्वाच्छिष्टाभावेनागमोन्य
स्याशिष्टत्वात्।दर्शपूर्णमासयोःश्रुतद्रव्यापचारेद्रव्यांतरंप्रतिनिधायप्रयोगःकर्तव्योनेतिविचारेनकर्तव्यइत्याह सर्वशक्त्य
धिकरणेअशक्यांगत्यागउक्तः।नपुनरंगांतरागमः।नचद्रव्यांतरागमेप्रमाणमस्तिकर्मचोदनानावत्नद्रव्यंप्रयुंक्ते।यत्तुद्रव्य
स्यप्रयोजकंव्रीहिभिर्यजेतेतितत्व्रीहीणामेवप्रयोजकंनान्यस्यातोनान्यागमः।स्यादेवंयदिव्रीहिशास्त्रंद्रव्यस्यविधायकं
स्यात्कर्मचोदनयाताक्षिप्तंद्रव्यंव्रीहिशास्त्रेणनियम्यते।पदात्वलाभाद्व्रीहीणामुपादानेव्रीहिचोदना।कर्मशास्त्रंतद्दाद्रव्य
मन्यदाक्षिपतिध्रुवं।तस्मादस्तिप्रतिनिधिः।नदेवताग्निशब्दक्रियमन्यार्थसंयोगात्।देवतानामग्नीन्द्रादिः।अग्निराहवनीयादिः

न्या० १६ 16 शब्दो मंत्रः क्रिया प्रयाजप्रोक्षणादिरदृष्टार्था। दृष्टार्थेष्ववघातादिष्वस्त्येव प्रतिनिधिः। नखनिर्लुंचनादिभिरपि तत्कार्यसि
द्धेः। तदेषां देवतानामपि विस्मरणादिनापचारे किं देवतांतरमग्न्यंतरं शब्दांतरं क्रियांतरं च प्रतिनिधेयमुतनेति। पूर्वेण न्या
येन प्रतिनिधौ प्राप्ते अभिधीयते यत्र हि प्रतिनिधीयमानं मुख्यस्य कार्यं साधयति। तत्र प्रतिनिधिर्न त्विह तथा संभवति। देव
तातावद्विधिलक्षणा न चान्यानीयमाना देवता भवति न चादेवतायै संकल्प्यमाने यागो भवति अतो न देवताकार्यमन्यतः
संभवति। तथाहवनीयादिरदृष्टार्थो विनाप्याधारेण प्रक्षेपसंभवात् न च तददृष्टमन्येन सिध्यतीति प्रमाणमस्ति। न
वारादिना — पुरोडाशनिर्वृत्तिः प्रत्यक्षमनुभूयते मंत्रस्तु यद्यपि प्रकाशनार्थत्वात् दृष्टार्थस्तथापि तस्य ध्यानादिनापि
सिद्धेर्न मंत्रांतरं शब्दांतरं वा प्रतिनिधेयं अवश्यं हि तदर्थप्रकाशकं शब्दं प्रतिनिदधता पूर्वं तदर्थः स्मर्तव्यः तस्मिंश्च स्मृते
कृतकरत्वान्न शब्दांतरं प्रतिनिधेयं। यत्तु मंत्रनियमकृतमदृष्टं न तदन्येन सिध्यतीत्यप्रतिनिधिमाहुस्तेषां व्रीह्याद्यपचारेपि
तत्कृतनियमस्यान्यथासिद्धेर्धान्यांतरं प्रतिनिधिर्न सिध्येत्। प्रयाजादिकार्यस्याप्यन्यतः सिद्ध्यनवगमान्नास्ति प्रतिनिधिः रम १६

।प्रतिषिद्धं चाविशेषेण हि तच्छ्रुतिः। अथ यत्तियावैमाषा वरकाः कोद्रवा इति प्रतिषिद्धयज्ञसाधनभावानां माषस्य यज्ञांगत्वं किं
तु तद्रूतस्य प्रतीत्याद्यंशस्मात्ः प्रतिनिधेया माषादयः। नैतदेवं। अयज्ञिया इति यज्ञार्हतामात्रं प्रतिषिध्यते प्रतिनिधित्वे चाव
र्जनीयं साधनत्वं। अतो नैतेषां प्रतिनिधित्वं॥ तथा स्वामिनः फलेसमवायात् फलस्य कर्मयोगित्वात्। प्रोषिते कार्यान्तरव्यापृ
ते वा यजमाने किं याजमाने किं प्रान परार्थकरणाय पुरुषांतरं प्रतिनिधेयं। उतनेति। प्रतिनिधीयमान उच्यते। म्रतेनावन्न कृ
पुरुषांतरं प्रतिनिरध्यात् कोवाध्वर्य्वादीन् प्रवर्तयेत् स्वयं प्रवर्तमानेषु वर्तेषु न म्रतस्याकर्तुः फलं सिध्यतिः यदि तु प्रतिहि
त एव फलमपि लभते ततोसौ मुख्य एवस्यान्न प्रतिनिधिः। पत्नीत्व स्वतंत्रानग्निश्च म्रते पत्यौ पुरुषांतरं प्रतिनिधापयेयो
क्ष्यतीत्यनाशंकनीयमेव। प्रोषिते न्यथा प्रते च यजमाने एतावत्परार्था आज्यावेक्षणादयः तेषु यथा समाख्यमध्वर्य्वादय
एव कर्तार इति न प्रतिनिधिना कार्यं फलितं स्कार एस्त्वन्येन क्रियमाणा न यजमानस्य योग्यतां जनयंतीत्यनर्थकः प्रतिनिधिः। व
हूनां तु प्रवृत्ते न्यमागमये रवेगुरुपात्। सप्तदशावराः सत्रमासीरन्निति सप्तदशसु प्रवृत्तेषु यदा कश्चित् म्रियते तदा तत्र

२११० स्थानेन्यः प्रतिः निधेयः । उक्तमेति । न स्वामिनः प्रतिनिधिरित्युक्तं । एवं प्राप्तेस्ति प्रतिनिधिरित्याह । काम्यमपि कर्म यदा प्रवृत्तं भवति
१७ तदावश्यं समापनीयमित्युक्तं । आवश्यकत्वाच्च यथाशक्ति प्रयोक्तव्यं । अतो यद्यपि यजमाना स्तेऽकृत्विज इति यजमानश्च
17 स्वस्वामिभूतकर्तृवचनत्वात् एकपदोपात्तयोश्च स्वामिकर्तृत्वयोरार्त्विज्योद्देशेन विधिसंभवात् स्वामिभिरेवार्त्विज्यं कर्त
व्यं । आनीयमानश्चोपरितनाधिकरणन्यायेन स्वामी न भवति तथापि तथापि तन्मात्रं हित्वा कर्त्रंशे सादृश्यं समापयि
तुमागमयितव्यं पुरुषान्तरं । स स्वामी स्यात्तत्संयोगात् । यो सावानीतः स किं स्वामी फलभागी स्यात् उत कर्तृमात्रमिति सं
शये स्वामिस्थानोपनिपातात्स्वामित्वं मन्यमानस्योत्तरं यो ह्यारब्धं समापयति तस्य फलमयं पुनर्मध्ये प्रविष्टो न फलं प्राप्तु
मर्हति । न चासौ विधिवशात् प्रवृत्तो येन विधिप्रामाण्यात् फलं लभेत इतरै रिह स्वामिभिः सौमामादिभिः सत्यासंपत्त्यर्थमा
नीतः तस्मान्नास्य स्वामित्वं । न दूर्ध्मास्यात्तत्संयोगात् । किमानीतस्य फलिसंस्कारः कर्तव्यो न वेति विचारः फलप्रतिग्रहणयो
ग्यतार्जननार्थाह्णिति । न यानीतस्य फलमित्युक्तं अतो नास्य फलिसंस्कारः । सत्यं नास्ति फलमितरेषां तु समस्तदृशकर्तृकेः सं एम १८

स्कारैर्योग्यता जन्यते। सर्वत्र कर्त्रंशे सामदृश्यनिवेशान्न तस्त तत्सिध्यर्थं प्रतिनिधिरपि संस्कारान्न कुर्यात्। सामान्यं तद्विकी
र्षीहि। श्रुतापचारे प्रतिनिध्युपादानं स्थितं। तत्र यत् किंचित् प्रतिनिधातव्यं उत श्रुतसदृशमेवेति संशयः। तत्राग्नेयचो
दनात्तावद् यत् किंचित् द्रव्यमाक्षिपेत्। व्रीहिशास्त्रं पुनर्व्रीहिविषयं नात्मगोचरं। अतः केन प्रमाणेन सदृशस्योपसंग्रहः। व्री
हिचोदनया सत्त्वं व्रीहिजातिर्विधीयते। सा च द्रव्यपरिच्छेदद्वारेणांगत्वमश्नुते। तच्च द्रव्यं परिच्छिन्नमनेकावयवात्मकं॥ अ
वयवा एव स्वैकद्रव्यतामापन्ना अवयविशब्दाभिधेया जात्यापरिच्छिद्यन्ते नत्वसन्तमर्थान्तरं अतस्तैरवयवैर्जात्याश्रयभूतैः
कर्मसिक्तं भवति विसदृशोपादाने पुनः समस्तपरित्यागः स्यात्। अतो व्रीहिशास्त्रमपि यथासंभवमुपपादयितुं सदृशोपादानमे
वं च सुसदृशोऽभेदं सदृशं नोपादेयं सुसदृशे बह्ववयवानुग्रहात्॥ ॥निर्देशात्तु विकल्पे यत्प्रवृत्तं। वैकल्पिकेषु व्रीहियवादिषु ए
केन व्रीहिणा प्रक्रान्ते प्रयोगे यदि तस्यापचारो भवति तदा किं वैकल्पिकान्तरमुपादेयमुत व्रीहिसदृशमिति संशये। मुख्येऽसति प्र
तिनिध्ययोगाद्यवोपादाने प्राप्ते ब्रूमः। वैकल्पिकेषु यावदेकमनुपक्रान्तं तावदितरेषां प्राप्तिः उपक्रान्ते तु तस्मिन् प्रयोगे तदेवां

न्या० गमितरत्वंगमेवव्रीहिभिश्चसंकल्पयवैः कुर्वाणोनान्नतंवदेदितिकृत्वंगभूतेप्रतिषेधमतिक्रमेत। आलोव्रीहीणामेवांगत्वात्
१८ तत्सदृशमेवोपादेयं। वचनाच्चान्याप्यम — वेतत्सामान्येनप्रतिषिद्धेर्निरभावादितरस्य। यदिसोमंनविंदेत पूतीकानभिषुणुया
दितिकिमयमभावेविधिः सोमाभावेपूतीकैर्यागंसाधयेदितिसोमजातिवत् पूतीकजातिर्यागसाधनपरिच्छेदकत्वेनवि
धीयतेउतप्रतिनिधिनियमः। यः सोमजातिपरिच्छिन्नात् अवयवान्समकलानुपादातुमशक्तोविकलानुपादत्ते तेसपू
तीकगतानितिपूतीकत्वंसोमावयवोपलक्षणंनसाधनोपलक्षणमिति॥ तत्राभावेविधिरितिप्राप्तेनियमइत्याह। साध
नत्वंहिपूतीकानामसंताप्राप्तंविधातव्यंप्रतिनिधिनियमेतुपाक्षिकप्राप्तानांनियममात्रंविधीयतइतिलाघवंभवति
ननुसुसदृशानामन्येषांसंभवादीषत्सदृशाः पूतीकानैवपक्षेपिप्राप्नुवंतीतिकथंनियम्यंते। उच्यते। सोसादृश्यंहिनप्र
तिनिधेः प्रापकं किंतर्हिनियामकंमुख्याभावात्तुप्रतिनिधेः प्राप्तिः तस्यांचावस्थायांयावन्न्यायेनसुसदृशंनियंतुमुपक्र
म्यतेतावद्वचनेनासुसदृशाः पूतीकानियम्यंतेऽतः प्रतिनिधिनियमोयं। नप्रतिनिधोसमत्वात्॥ ॥यत्रप्रतिनिधीना राम १८

प्रयोगेप्रक्रान्तेसतितस्यापचारेभवतितदाकिंप्रतिनिधीसदृशमुपादातव्यं।उतमुख्यसदृशमितिसंशयेवैकल्पिकन्यायेनप्र
क्रान्तस्यैवतस्मिन्प्रयोगेङ्गत्वात्तत्सदृशमेवोपादेयंनमुख्यसदृशं।मैवं।नहिनीवाराणामङ्गत्वमस्तिप्रमाणाभावात्।व्रीह्य
वयवांस्तुतद्गतानुपाददानोनान्तरीयकतयानीवारानुपाददानेनाङ्गतयाप्राप्तास्तत्तदपचारेपुनरपिश्रुतावयवत्वाभावाद्व्रीहिस
दृशमेवोपादेयं।स्याच्छ्रुतिलक्षणेनियतत्वात्।। ।।यद्यपिप्रमाणाभावान्नीवारादीनामनङ्गत्वंश्रुतिलक्षणस्यतुपूतीका
देरङ्गत्वात्तस्यप्रक्रान्तस्यापचारेतत्सदृशमेवोपादेयंनसोमसदृशं।नैवं।नहिश्रुतिःपूतीकानामङ्गत्वमाह।किंतर्हितद्गतानांसो
मावयवानांप्रतिनिधिनियमोस्यर्पंनाभावेविधिरित्युक्तं।अतस्तदपचारेपिसोमसदृशस्यैवोपादानं।मुख्याधिगमेमुख्यमा
गमोहितदभावात्।यदामुख्यमलभ्यंमत्वाप्रतिनिधिमुपादातुंप्रस्थितःयद्यन्तरामुख्यंलभतेतदाकिंमुख्यमेवोपाददीताथ
योपाददीताथवाप्रतिनिधिमिति।प्रतिनिधेःसंकल्पितत्वाल्लब्ध्वंमुख्यमनादृत्यप्रतिनिधिमेवोपाददीतअन्यथामिथ्यासंकल्पा
पत्तेः।उच्यते।यथाशक्तिशास्त्रार्थंसंपादयामीत्येवंसंकल्पितत्वान्नप्रतिनिधिस्वरूपंनचमुख्येसंभवतिप्रतिनिधिःशास्त्रार्थोभ

श्रा० वति। अतो मुख्याधिगमे तदेव स्यात्। प्रवृत्तेपीति चेत्। यदा पुनर्मुख्यं खदिरमलब्ध्वा प्रतिनिधिं कदरमुपादाय तत्क्षणादिषु कृतेषु
१९ चित्संस्कारेषु कृतेषु प्राकूपभ्युनियोजनात् खदिरं लभते तदा किमुपात्तेन प्रतिनिधिना कार्यं कुर्यात्। उत तत्त्यागेन मुख्यमेवोपा
दायसंस्कारांश्च पुनः कृत्वा तत्रैव यपभ्युं नियुंजीतेति संशयः। तत्रोपात्ते प्रतिनिधौ निवृत्तव्यापारत्वेनान्यदुपादापयति। तस्मा
न्नमुख्यसंग्रह इति प्राप्तेभिधीयते। नोपादानपरं शास्त्रं येन तस्मिन् कृते निवृत्तव्यापारं स्यात् प्रधानानुष्ठानार्थं शास्त्रं तच्च
प्रधानं सति मुख्ये प्रतिनिधिना क्रियमाणं विगुणं स्यात्। अतः संस्कृतमपि कदरं हित्वा खदिर एव यपभ्युर्नियोज्यः। एवं व्रीह्यादिषु
द्रष्टव्यं नितरां कृतमपि नानर्थकत्वात्॥ वृते प्रतिनिधिना नियोजने यदा मुख्यमेव लब्धं योजनं स्यात् तदुपाय पुनः खदिरेक
र्तव्यमिति मन्वानस्योत्तरं कृते नियोजने लब्धोपि खदिरोनर्थक एव। नियोजनार्थं हि तदुपादानं तच्च कृतं न गुणानुरोधादाव
र्तयितव्यं। अतो नादर्तव्यः खदिरः अथवा सूत्रद्वयमिदमेकाधिकरणं प्रवृत्तेपि प्रधाने मुख्योपादानं स्यादिति चेन्नानर्थकत्वा
दिति। द्रव्यसंस्कारविरोधे द्रव्यं तदर्थत्वात्। यदा तु पुनस्त्वत्त्वा तक्षणादिसंस्काराणामयोग्यः खदिरो नियोजनमात्रेयो रम १९

ग्यः कदरश्च महान्संस्कारयोग्यः तदा कस्योपादानमिति। खदिरोपादाने संस्काराणां बहूनामत्यंत हानिः स्यात्‌। कदरे पुनस्तेषाम
नुग्रहः। खदिरशास्त्रमपि किंचित्‌ न्यूनं संपादितं भवति ततस्तस्योपादानं। नैतदेवं। बहवोपि हि द्रव्यार्था एव संस्कारास्तेषां ना
न्यत्वयोजनं। तदंशेन ततोन्यस्य परित्यागो न युज्यते। ततः संस्कारहीनेपि खदिरे स्यान्नियोजनं। तस्य पाशानि लुप्येरन्प्रधा
नेन विरोधतः। अर्थद्रव्यविरोधेर्थो द्रव्याभावे तदुत्पत्तिर्द्रव्याणामर्थशेषत्वात्‌॥ ॥यदा पुनरनितनुत्वान्नियोजनस्याप्य
योग्या खदिरलता भवति तदापि किं मुख्यालाभात्‌ सैवोपादेया नेत्याह। नहि तयोपात्तयापि कश्चिदर्थः कार्यक्षमत्वात्‌। अतस्ता
दृशेलब्धेपि तद्द्वारेण प्रतिनिधिरेव कदरः कार्यक्षम उपादातव्यः। विधिरप्येकदेशे स्यात्‌। दर्शपूर्णमासयोर्यदाश्वश्वकपरि
माणाशेषकार्येभ्यश्चापर्याप्ताः पुरोडाशजातीमात्राभिव्यक्तिसमर्थाः। व्रीहयो लभ्यंते। तदा किं तैरेव पुरोडाशः कर्तव्यः उत
नीवारैरिति संशयः। तत्राभूयसां शेषकार्याणामाभूदत्यंतबाधनाय एकस्य व्रीहिशास्त्रस्य किंचिद्बाधस्तु युज्यते। नीवारोपादा
ने व्रीहिशास्त्रमेकं विकलं भवति। व्रीह्युपादाने पुनर्भूयसामत्यंतबाधः स्यात्‌। न च व्रीहीणां प्रधानांगत्वेपेन द्रव्यांगभूतेभ्यः

शा० शेषकार्येभ्यः। अंगगुणविरोधन्यायेन बलीयस्त्वं स्यात्। व्रीहिणामपि पुरोडाशप्रकृतित्वात्तदंगत्वात्। उच्यते। व्रीहयोऽपि पुरोडाशभू-
२९ तायागस्य साधनं। तद्वैकल्ये प्रधानस्य गुणहानिः प्रसज्यते। व्रीह्यवपवाराव पुरोडाशभावापन्ना यागं साधयंतीति ते च नीवारोपा-
20 दाने विकलाः स्युस्तवश्च प्रधानवैगुण्यं स्यात्। तस्मात्त्वेषकार्यण्यपि नारत्य व्रीहिभिरेव पुरोडाशः कर्तव्यः॥ ॥इति श्रीशास्त्रदी-
पिकायां षष्ठस्य तृतीयः पादः॥ ॥शेषा— चरानननाशे स्यात्तदर्थत्वात्॥ ॥पूर्वस्मिन् पादे यथाशक्त्यनुष्ठानगतो विचारो वृत्तश्च
अतः परं पादद्वयेन प्रायश्चित्ताधिकारश्चिंत्यते॥ कीदृशेन निमित्तेन कस्मिन्ने मितिके प्रायश्चित्ते धिक्रियते इति। न रिहतावदि-
दं चिंत्यते। दर्शपूर्णमासयोर्मध्यात्पूर्वार्धाद्दवघतीति श्रूयते। यदा चावतस्य नाशदोषायहाराभवं नितदा विंशस्य सर्वाण्यपि हवीं-
षि नश्येयुर्दुः ष्येयुरपहरेयुर्वाऽऽज्येनैता देवताः परिसंख्याय यजेतेति हविर्विनाशादि निमित्तेन चोदिताज्य यागेनाधिक्रिय-
ते। तत्र तस्यामवस्थायां शेषादेव पुनरवदेयं आज्यं तु निःशेषनष्टे हविषि चोद्यत इति किं प्राप्तं। विनष्टेऽवदाने पुनर्मध्यपूर्वा-
र्धसंभवानावनमात्रस्य च शास्त्रार्थत्वान्न तरावावदेयं न हविरंतरापेक्षा हविरंतरापेक्षापां चाज्यं विधीयते नास्ति नरावह- राम २०

विधिचोदनात्तस्मात्तेषां शेषस्य देयं एवं प्राप्ते ब्रूमः। कृत्स्नं खलु पुरोडाशं प्रकृत्य श्रूयते वचः। मध्याद्द्व्यवतो सेति हि कृत्स्नान्नावगम्यते। कृ
त्स्नस्य हि पुरोडाशस्य यो मध्यदेशस्तस्यावदानको यस्तस्योपरितनोऽङ्गुष्ठपर्वमात्रोवयवः सोवदातव्यः। यस्तु तस्याधस्तनोवयवः
सोवदेयस्यापादानभूतः न तु सावदातव्यः। अतो नासौ हविः यत्तु हविस्तद्धि नष्टं तद्विनाशे च हविरन्तरमुत्पाद्यं। यदापि सम
स्तपुरोडाशस्याध्योपागस्तदापि द्व्यवदाननाशे तस्य विकृतत्वाद्विकृतं हविरन्तरमुत्पाद्यं। न तस्यायतः पुरोडाशान्तरं वचनात्प्राप्तं
भवति। न च यस्य सर्वा— इति वचनात्तेषां हविषां विनाशेऽप्राप्तमिति भ्रमितव्यं। हविर्नाशस्य निमित्तत्वात्। सर्वशब्देनाविशे
षणात्॥ ॥अपि वा शेषभाजां स्याद्विशिष्टकारणत्वात्॥ ॥स्विष्टकृदिडाद्यर्थस्य नाशः किं शेषावदानस्य निमित्तत्वात्। सर्वश
ब्देनाविशेषणात्॥ ॥अपि वा शेषभाजां स्याद्विशिष्टकारणत्वात्॥ ॥स्विष्टकृदिडाद्यर्थस्य नाशः किं शेषावदानस्य निमित्तमुतने
ति। तन्नाशे शेषाद्देयं यागशेषप्रतिपत्त्यर्थत्वात् विनष्टेपि तद्द्रव्ये पुनः। शेषसद्भावात् पुनरुत्पाद्य संस्कर्तव्यं। सत्यं विद्यते
शेषः सत्यागाभिप्रतिपत्त्यन्तरगृहीतत्वान्न न शावयवद्रव्यप्रतियत्तासंबध्यते। यस्त्वंशस्तस्य प्रतिपाद्यः स विनष्टः। न चद्र

न्या० यांतरेत्यस्याशंकाशेषप्रतिपत्त्यर्थानांद्रव्यांतरेष्विसमाणानामानर्थक्यात्स्विष्टकृत्तुपयुप्यप्रदर्शनात्तथाप्येकदेशद्रव्य
२१ त्वात्तद्द्रव्यांतरस्याप्रयोजकः। वा चनिकेनतुहविर्विनाशादिनिमित्तेचोदितेनान्येनतदनुष्ठानमिष्टमेव।। इदायथर्थगृहीत
स्यतुहविष्ट्वाभावात्प्रतिपत्तिर्यनिरिक्तासूर्याभावात्त्वेलोपएवन्याय्यः।। निर्देशाच्छेषभक्षेस्यैःप्रधानवत्। शेषप्रसंगादि
21 दमधिकरणं। दर्शपूर्णमासयोः शेषभक्षास्तेकिंमत्विग्भ्योन्यैःकर्तव्याउतऋत्विग्भिरेवेतिसंशयः।। तत्रकर्मकरत्वादृत्वि
जांसर्वभक्षेषुप्राप्तानामिडायांपुनःश्रवणमस्तियजमानपंचमाइडांभक्षयंतीतितत्तभक्षांतरपरिसंख्यार्थमिडामेवतेभक्ष
यंतीतितस्मादन्येषुन्येभक्षयितारइत्याशंक्यनिराक्रियते। यजमानस्याकर्मकरत्वेनाप्राप्तस्यप्रापकमिदंवचनं। अतोऽपरिसं
ख्यातत्वात्तभक्षांतरेणांतेष्वपिमकृतारएवकर्तारः। अर्थसमवायात्प्रायश्चित्तमेकदेशेपि। दर्शपूर्णमासयोःकपालमधिकृ
त्यश्रूयतेभिन्नेजुहोतीति। तत्रसंशयः। किंकृत्स्नभेदोनिमित्तमुतैकदेशभेदनंउतोभयमिति। तत्रैकदेशभेदस्यानित्यत्वान्न
निमित्ततनाकादाचित्कस्तुकृत्स्नस्यभेदोगच्छन्निमित्ततांभिदुराणांहिद्रव्याणांमिथःसंघर्षेणानित्यःकेनाप्यंशेनभेदइतिन राम २१

निमित्तत्वं संभवति अतः कृत्स्नभेद एव निमित्तं। नैवं न हि संघर्षणमात्राच्छिन्नबुद्धिर्भवति संघृष्टमिति हि तदा बुद्धिर्भवति न भिन्नमि
ति भेदनं चेह निमित्तं तच्चैकदेशेऽप्यनित्यत्वान्निमित्तं भवत्येवेति हि। तोपपक्षवादी तु मन्यते होमो यभिन्नसंस्कारभेदहोमनिबर्हणा
त्संनिपत्योपकारित्वं तथा सति हि लभ्यते॥ ॥आराडपक्रियातश्चन्याप्यास्यास्संनिपातिता। संनिपातित्वपक्षे तु वाक्यसंस्था
त्संनिपातिता। संनिपातित्वपक्षे तु वाक्यसंस्था हि नियोजकं॥ ॥आ एडयन्क्रियात्वे तु प्रक्रिया विनियोजिका। कापर्दसमश्च संस्कार्यः
कृत्स्नभिन्नं न क्षमं। न हि सर्वथा भिन्नं कपालमधिश्रयणयोग्यं भवति अकार्योपयोगिनश्चानर्थकः संस्कारः तस्मात्तत्कार्या
विरोधेन परा क्रियतामप्यंशेन भेदो भवति तदैव होम इति घा तेब्रूमः। संस्कारत्वे भवत्येवं नात्र यं भिन्नसंस्क्रिया। संस्कार्यत्वे हि भि
न्नस्य निमित्तत्वं न लभ्यते। निमित्ताभावतो होमो नित्यमंगं न तो भवेत्। नित्यस्थानित्यसंस्कार्यसंबंधं लभते कथं। यदा हि भिन्नं सं
स्कार्यत्वेनोद्दिष्टं तत्संस्कारार्थत्वेन होमो विधीयते तदा भिन्नशब्दस्य संस्कार्यप्रतिपादनोपक्षयान्न निमित्तपरत्वं स्यात्। असति
च निमित्ते होमो यं नित्यांगं स्यात्। तदेवमापद्यते नित्यं दर्शपूर्णमासप्रयोगे नोपकुर्यात् भिन्नकपालसंस्कारद्वारेणेति न चैत

न्या०
२२

तत्संभवति भिन्नस्य कादाचित्कत्वेन न नित्यवत्तत्रताव भावात्। सोऽयं नित्यानित्यसंयोगविरोधः तस्माद्दहने निमित्ते होमो विधीयते स

चाविशेषाद्देकदेशभेदे कृत्स्नभेदेऽपि स्यात्। क्षामे तु सर्वदा हस्यादेकदेशस्यावर्जनीयत्वात्। यस्य पुरोडाशः क्षायति तं यज्ञं नि

र्ऋतिर्गृह्णाति यदा तद्धविः संतिष्ठेत अथ तद्देवहविर्निर्वपेत्। यत्नो यत्नस्य प्रायश्चित्तिरिति पुरोडाशक्षाणनिमित्तः पुनः

प्रयोगः कृत्स्नैकदेशक्षाणयोरविशेषेणाभेदेन होमवत्स्यादिति प्राप्ते भिधीयते। क्षामे हविषि यत्प्रायश्चित्तं तत्तन्न सर्वस्मि

न् किं तु सर्वदाहे स्यात्। पुनः एकदेशक्षाणस्यावर्जनीयत्वेन न नित्यत्वान्निमित्तत्वायोगात्। अथावर्जनीयदाहातिरिक्तो दाह

एकदेशेऽपि वर्तमानो निमित्तं स्यादित्युच्यते। तन्न। अपरिज्ञानादिहावर्ज्जनीयो दाहो नाधिकः इति। तस्मात्सर्वक्षाणमिह

निमित्तं। यथाश्रुतीति चेत्। दर्शपूर्णमासयोर्द्वैरोहो प्रकृत्यश्रूयते यस्योभयं हविरार्तिमाच्छेत् ऐन्द्रं पंचशरावमोदनं निर्वपे

दिति। तत्र संशयः किमुभयार्तावपि पंचशरावउतान्यतरार्ताविपीति। ग्रहाधिकरणन्यायेनोद्देश्यस्य निमित्तस्य विशेषणमविवक्षि

तमिति स्थितमेव। ननु निमित्तस्वरूपमपि अविवक्षितं रहतु यथा नार्तिमात्रं निमित्तं न द्व विमेन्त्रिं मिलितं तु निमित्तं एवमुभ राम
२२

पशुशाम्नानात्त्रयमपि मिलितं निमित्तमस्तु तस्मादुभयार्त्तौ पंचशराव इति माहेन्नूमः। यच्छ ह्रो पक्रमं यावन्निमित्तं पर्यवस्यति। ता
वद्भासंतं नतोऽप्यनुश्रुतमप्यविवक्षितं। यस्मान्निमात्त्रैर्दिश्येतावताचयन्तिं। चिरिति गम्येतनत्त्वनित्यं न निमित्तं भवतुमर्हति। सर्वस्यहि
सर्वदायत्त किंचिदार्त्तं भवति अंततश्चिंतितनिमिषितादि। तथापस्यं हविरिति हविषोपि नित्य— इतोऽवश्यमास्याहविर्विशेष्यं। ताव
तावताचनिमित्तमत्तानिर्यवसानादुभय पदं निमित्तरूपेन प्रविष्टं। अथोभयविशिष्टमेव हवि निमित्तं नार्तिविशिष्टमित्युच्यते तत्त
दपिनित्यं। अथयस्योभयमार्त्तमित्यार्तिविशिष्टमुभयं तद्दिष्टावार्त्तानि निमित्तं न हविः। तदयुक्तं। यस्योभयार्तिमार्त्तमिति कि
तउभयमित्याकांक्षास्यात्। तस्माद्धविः शब्दार्तिशब्दौ तावद्द्वश्यं विवक्षितौ भवतु हविर्विवक्षातत्तु उभयपदसन्निधाना
त्तद्विशिष्टं सादार्त्या संबंध्यते न स्वरूपेणेति चेत्। पश्चैव हविः शब्द आर्द्धिदिस्यनेनाख्यातेन संबध्यते तयोभयपदमप्यसम
स्तत्वान्नैव संबध्यते न हविषा नामपदानां परस्परासंबद्धानामाख्यातेन संबंधात्। तत्र यदि यस्य हविरार्त्तं यस्योभयमा
र्त्तमिति द्वयं निमित्तीकृत्य पंचशरावो विधीयते तथा सति निमित्तयोरुपादेयानामिवारुणादीनां त्रियमावशीकारसंभ

शा० गान्निमित्ताभ्यामेवक्रियापावशात्कृतायाः प्रत्येकसंबंधनिमित्तो वाक्यभेदः। पुनरपि हविरार्तिश्चान्यतरार्त्या वा विशिष्टेति तत्रा
२३ पि नैमित्तिकं साधिनि सिद्धं नः समीहितं। उभयार्तिमात्रमनिरूपितं न निमित्तं भवतीत्यविवक्षैवावशिष्यते। यद्यपि चोभयपद
माख्यातं हित्वा हविषा संबध्यते। तथापि यदि उभयपदं हविः स्वरूपेण संबध्यते हविः स्वरूपं चार्त्यां तथा सति हविषश्चार्तिसंब
धस्य निमित्तत्वात् पुनरस्मत्पक्षसिद्धिः। अथ तदुभयपदानुरक्तमार्त्यां संबध्यते तदनुरक्तं चोभयपदेन। तन्न। नहि पदद्वयं ह
विषा संबध्यमानमितरसंबंधं प्राप्तवद्भिर्लब्धं केनकारणेनाभावाद्धविः स्वरूपेणैव संबंधसंभवात्। अथार्तिरेवोभाभ्यां विशिष्टा
निमित्तं स्यात् तथाप्येकैकेनेतरेतरनिरपेक्षेणाविशेषणान्निमित्तत्वेन चाविवक्षितत्वादित्यस्माद्धविरार्तिमात्रं च निमित्तं स्या
त्। अन्यतरानुरक्तायास्त्वन्यतरेण संबंधे हि रूपत्रयाद्वाक्यभेदः स्यात्। अतो नोभयं निमित्तसन्नियानि। तत्र चार्तं हविर्मा
त्रमुद्दिश्य पंचशरावं विधीयमाने यद्युभयत्वं हविषि विधीयेत ततो ते वाक्यभेदः॥ परिच्छेदकत्वेन च विधीयमाने विधीयेत पाव राम
न्निमित्तं च नैमित्तिकानुष्ठानस्यानिश्चितत्वान्न परिच्छेदकाकांक्षा निश्चिते च सर्वत्र नैमित्तिके विधीयमानमप्युभयत्वं परि २३

संख्यार्थं स्यात्। न चैकेन वाक्येन विधिः परिसंख्या च संभवतीत्यादि दूषणजातं ग्रहाधिकरणोक्तमनुसंधातव्यं। तस्माद्धविरार्तिमात्रं निमि-
त्तं। उभयपदत्वे चं यो ग्र्यं न सापंरो हार्तिरेव निमित्तं न मात्रदोहार्तिरेवाकिंतु उभयमपि परस्परेण न पेक्षं निमित्तमिति। होमाभिषवभक्ष-
णं च तद्वत्॥ ॥ ज्योतिष्टोमे श्रूयते ग्राभिषुत्य हुत्वा भक्षयन्तीति। तत्र विक्रमभिषवो होमश्च प्रत्येकं भक्षस्य कारणं उत संहत्येति। उद्देश्यत्वा-
त्साहित्यं नयोः शक्यं विवक्षितं। ततः प्रत्येकमेवाभ्यां भक्षणं प्रतिभवते। न स्यैकेनैव वाक्येनाभिषवहोमौ निमित्तत्वेनोद्दिश्य भक्षणं
विदधता तत्साहित्यमपरं शक्यं विधातुं वाक्यभेदप्रसंगात्। अतः प्रत्येकमेव निमित्तत्वं। उच्यते। निमित्तत्वेऽपि वैदेवमेकैकस्य निमि-
त्तता। होमाभिषवकर्तातु भक्षांगत्वेन चोद्यते। द्वितीयानिर्दिष्टसोमसंस्कारार्थो भक्षः तं प्रति प्रयोजनान्तरप्रयुक्ताभिषवहोम-
कर्तृगुणत्वेनोपादीयमानो विवक्षितविशेषणो भवति। तत्रार्थिकं होमाभिषवयोर्निमित्तत्वं न तु शाब्दं। अभिषवहोमसमानक-
र्तृकं तु भक्षणं शाब्दं तेनाभिषवसमानकर्तृकत्वं होमसमानकर्तृकत्वं च द्वयं विवक्षितं साहित्यं भक्षणांगं। ग्राता यो येनोभयमनु-
ष्ठितं स एव भक्षयेत्। पुनराधेयमोदनवत्॥ यस्योभावग्नी अनुगतावभिनिम्लोचेदभ्युदियाद्वा पुनराधेयं तस्यमापश्चिनिरि

गाहूयसाहवनीये

शा० ति। किमुभयानुगमो निमित्तं उतान्यतरानुगमो वेति। समस्तेन पंचशरावन्यायेनान्यतरानुगममात्रं निमित्तमिति प्रागेवाभिधीयते। स
२४ त्यं निमित्तवेलायामुभाविन्त्य विवक्षितं। नैमित्तिकं तु नैवेतरेकस्यो त्पादनक्षमं। पुन एधेयं हि शाकांतरे यादृशमवगतं ता—
२४ दृशमेव गार्हपत्याहवनीययोरुदयास्तमनिम्लोचनवेलायामनुगतयोः। उत्पादकत्वेन चोद्यते। तच्च सहितयोरेव योरुत्वा
दकत्वं गतं नान्यतरस्य अतस्तत्तादृशमेवात्र विधीयमानमन्यतरानुगमेन कार्यं कर्तुं समर्थमिति उभयानुगमे स्यात्। पंचशरावस्तद्
व्यश्रुतेः प्रतिनिधिः स्यात्। यस्योभयं हविरार्तिमार्छेदैन्द्रं पंचशरावमोदनं निर्वपेदिति किमार्तौ सोऽह प्रतिनिधित्वेन पंचशरावो
मा तत्त्वात्कर्मण एव साधनं विधीयते उत कर्मान्तरं हविरार्तिनिमित्ते चोद्यत इति। आर्तत्वात् द्रव्ययोरन्यतत्कर्मणो द्रव्यमी
प्सितं। लाघवं च विधेरेवमतो द्रव्यविधिर्भवेत्। ननु पंचशरावपरिणाम ओदनद्रव्यमिन्द्रश्च देवतेति बहवोऽर्थाः प्राप्ते कर्मण्येवं
विधीयेरन्न। पंचशरावशब्दार्थमेकं विधास्यामः। तेन बहुव्रीहिणा अन्यपदार्थ ओदनव एय परिमाणविशिष्टो विधीयते
सान्नाय्यस्थानापत्त्या च तद्देवताप्राप्तेरैन्द्रं पदं नित्यानुवादः तस्मात् द्रव्यविधिः। उच्यते। स्थानापत्त्या हि नैकांतात्प्रा राम २४

रिंद्रस्य लभ्यते। महेन्द्रस्यापि सन्नाय्यात्तस्मादिन्द्रो विधीयते। अतः कर्मणि नैकेन विधिना द्रव्यदेवते। शक्ये विधातुं ताभ्यां तु विशि-
ष्टं कर्म चोद्यते। स तत्स्यामनेतस्यानात्। तदिदं कर्मान्तरं किममावास्यायां प्रत्स्यामनेत। उत तस्या एवांगमिति संशयः। त-
त्र पंचशरावः कार्यमपेक्षते रोहयोश्चात् तत्रादमावास्यानिवृत्तेति तत्कार्यं साधनमपेक्षते तयोरेकाकांक्षावशात्संबंधः
। तस्मादमावास्याकार्ये विधीयमानः पंचशरावयागस्तस्याः प्रत्याम्नायः स्यात्। स्यादेवं यद्यमावास्यानिवृत्ता न तु तत्त-
था। पूर्वद्रव्यविनाशेपि द्रव्यस्यान्यस्य संभवात्। संभवति यथोत्तरे दध्युत्तरे च नामावास्यानिवृत्तिः। अनुवृत्तायां च तस्यां
न तत्कार्यं साधनमपेक्षते। द्रव्यविनाशोपजनितवैगुण्यसमाधानं तपेक्षितव्यं। अतस्तदुपकारेणामावास्यांगं
पंचशरार्थैय:। विश्वजित प्रवृत्ते भावः कर्मणि स्यात्॥ यः सत्त्रायागुरते स विश्वजिता यजेतेति किमगूर्यप्रवृत्तस्य
विश्वजित् उताप्रवृत्तस्योतोभयोरिति संशयः। द्वयोरपि भवेत् कस्माद्विशेषस्याश्रुतत्वतः। प्रवृत्त एव वा कुर्यात्। तत्र
फलं न कल्पयितव्यं भवति निमित्तश्रुतिवैयर्थ्यान्निमित्ते तर्हि प्रयुज्यते। साधारण्ये च वैरूप्यं न तत्र पुरुषार्थता:। यथर्तुनसा।

शा० गुरणंनिमित्तंप्रतीयतेप्रकृतस्यचागुरणंनित्यंननिमित्तंभवितुमर्हतीतितत्रनिमित्तश्रुतिरुपरुध्येत।साधारणपक्षेतुप्रकृतंप्रतिक्र
२५ त्वर्थत्वात्प्रकृतंप्रतिपुरुषार्थत्वादैरूप्यंस्यात्।अथोभौप्रतिपुरुषार्थत्वेनविधीयेत।तथासतिफलकल्पनातावदवश्यं
भाविनीतत्रप्रकृतस्यानपेक्षितविधानंस्यात्।नहिसत्रमागूर्यकुर्वतःकिंचिदपेक्षितं।पक्षेसत्रफलायसत्रमागूर्यकुत
श्चित्कारणात्तत्रप्रकृतस्तस्यसत्रफलप्राप्तयेप्रारब्धाकरणदोषपरिहारायचसाधनमपेक्षमाणस्यविश्वजिद्विधा
नमपेक्षितार्थंभवति।तस्मात्सत्रमागूर्याकुर्वतःप्रायश्चित्तमिदं॥ ॥वत्ससंयोगेव्रतचोदनास्यात्॥ ॥कःप्रायश्चि
त्ताधिकारेस्यसंबंधः।उच्यतेविश्वजित्सत्रेप्रकृतस्याथाप्रकृतस्येतिविचारितेतत्प्रसंगाद्वत्सापाकरणलक्षितोव्रतकालः
किंसान्नाय्यप्रकृतस्यउतासान्नाय्ययाजिनोपीतिचिंतायतिता।तदुपोद्घातत्वेनप्रथमंकाललक्षणैवप्रतिपाद्यते।बर्हि
षापूर्णमासेव्रतमुपैतिवत्सैरमावास्यायामितिकिमयंवत्सविशिष्टव्रतविधिरुतव्रतानुवादेनवत्सविधिः।उतवत्सापाक
रणंव्रतकालोपलक्षणमितिसंशयः।तत्रवत्सविशिष्टव्रतविधानं।रागप्राप्तत्वाद्धिभोजनस्यतदनुवादेनवत्सविधिः। राम २५

नह्रि वत्सस्य व्रते पाण्यादिवत् करणत्वं संभवति। अथ वत्समेव व्रतयेत् तद्दशकां विशसने च वत्सव्याघातः। विध्यंतरं च पुरोव
त्सानपाकृतो दंपती अश्नीयातामिति विधत्ते तेनेतरेकं ग्रास्यं व्रतो व्रतोपायनस्य वत्सापाकरणेन कालो लक्ष्यते। कालः स
न्नयत्पक्षे तल्लिंगसंयोगात्। किमयं कालः सान्नाय्ययाजिन एवाऽथासान्नाय्ययाजिनोपीति विचारः। तत्र सान्ना
य्ययाजिनो वत्सापाकरणाभावान्न तदुपलक्षितकालसंभवः। ननु चैकपुरोडाशायामपि अव्रतपायोऽह्रि कालस्येति चेत्स्यात्। तेऽस
संतत्राग्नीषोमीयाभावोऽप्याग्नेयेन तदुपलक्षणासंभवः। इह वत्सापाकरणमेवोपलक्षणं तदभावे केन कालो लक्ष्येतेति वि
शेषाशंका उच्यते। सर्वथा तावदुपलक्षणमेव वत्सापाकरणं तदुपलक्षितकालद्वारेण व्रतकालं लक्षयति। तदयमर्थः। यो वत्सा
पाकरणकालस्ततः पूर्वकाले व्रतमिति संशयमग्न्यन्वाधानात् पश्चात्तत्कालोऽसान्नायिनोपि संभवति। तस्मात्तस्याप्यने
न कालेनाधिकारः। प्रस्तरेणाऽऽरवाश्च यणवत्। सह शाखया प्रस्तरं प्रहरतीति वचनं किं प्रस्तरप्रहरणांगत्वेन शाखां विधत्ते उत शा रम
खां विधत्ते उत शाखाप्रतिपत्तिः। प्रहरणं प्रस्तरप्रहरणकालेन निधीयते इति। प्रहरणांगत्वे सन्नपतापि शाखाहर्तव्या। प्रति

शा०
२६
26

चतुर्थे हरतेर्यजतिरूपत्वात्तत्र प्रस्तरस्य गुणभावात् शाखाया अपि सहशब्देन तत्तुल्यत्वावगमात् गुणभावशंका न शाखापाय
जौ साहित्यं प्रहरणमात्रे श्रवणाद्गुरतौ च प्रस्तरस्य प्राधान्याच्छाखायाः अपि प्राधान्यमित्युक्तं। इह तु पुनर्भवतु प्रहरणे सहभा
वः। तथापि न प्राधान्यं अयं हि वाक्यार्थः यत्प्रस्तरं प्रहरति तत्सहशाखया नान्यथेति शाखासंसर्गः प्रस्तरस्य प्रक्रियमाण
स्यांगं मैत्रावरुणग्रहस्येव पयःसंसर्गः यदि प्रस्तरप्रहरणकाले शाखाप्रहरणं विधित्सितं स्यात्ततः प्रस्तरेण सहशाखां
प्रहरेदितीदृशं वचनं स्यात्तस्मात्प्रस्तरांगं शाखा। ततश्चासंनयतापि प्रस्तरार्थत्वेन शाखाहर्तव्येति पूर्वः पक्षः
सिद्धांतस्तु प्रस्तरं प्रहरणेन प्रतिपादयेत्सहशाखयेति। यदि च शाखापि प्रतिपाद्यते ततः शाखया सह प्रस्तरः प्रति
पादितो भवति नान्यथेति न शब्दस्वारस्यात्तावच्छाखापि प्रतिपाद्येति गम्यते। न च प्रकारांतरमस्ति येन प्रतिपत्तिर्बाध्येत
। किंच तत्रोपयुक्ता शाखा प्रतिमपेक्षते नोपयोगांतरमतोपि प्रतिपत्तिः प्रस्तरस्य प्रहरणं तु तत्काले प्रतिपत्तिः शाखा
याः कथं साहित्येवमतः संनयतरावशाखाहरणमिदमपि शास्त्रांगिकमेवाधिकरणं व्रतकालोऽसंनयतोपीत्युक्तं। राम
२६

शाखाहरणं तु नैवं किं तु संनयतरा वेति। यद्वा वत्सापाकरणं कालोपलक्षणमित्युक्तं प्रस्तरप्रहरणमपि कालोपलक्षणमित्यु
च्यते॥ ॥इति श्रीशास्त्रदीपिकायां षष्ठस्य चतुर्थः पादः। अभ्युदये कालापराधादिज्याचोदनास्यात्तथा पंचशरावे। अ
काले प्रक्रांते दर्शे प्रायश्चित्तमाम्नातं। यस्य हविर्निरुप्तं पुरस्ताच्चंद्रमा अभ्युदियात्स त्रेधा तंडुलान् विभजेद्ये मध्यमाः स्युस्तान
ग्नये दात्रे पुरोडाशमष्टाकपालं कुर्याद्ये स्थविष्ठास्तानिंद्राय प्रदात्रे दधंश्चरुं ये क्षोदिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुमिति
।तत्र संशयः किं कर्मांतरमिदमुत प्रक्रांतस्यैव दर्शस्य देवतापनयो देवतांतरयोगश्चोद्यत इति। अनेकार्थविधापि
त्वात्कर्मांतरविधिर्भवेत्। प्राप्तकर्मानुवादेन नानेकार्थविधिः क्षमः। अग्न्यादयो देवतास्तद्गुणाश्च दातृत्वादयोऽधिश्रित
योश्चाधिकरणत्वं स्थविष्ठानां चचरुत्वमिति बहवोर्था नापूर्वविधिमंतरेण शक्यंते विधातुं। तस्मात्कर्मांतरमेवाकालोपपन्न
मप्रायश्चित्तत्वेन विधीयत इति प्राप्त उच्यते। प्रकृतप्रत्यभिज्ञानान्न कर्मांतरचोदना। प्राकृतीभ्यस्तदाछिद्य द्रव्यमन्याभ्य उच्य
ते। न चातावत्संभवत्यांगतो प्रकृतहानाप्रकृतकल्पना विशिष्टविधानापूर्वकर्मांतरकल्पनं स्यात्प्यसंभवति चात्र प्रक्रां।

ग्रा० ८

27

तएवगुणविधानं। तथाहि त्रिधातंडुलान्विभजेदित्यनेन तावन्मध्यमादिभावेन तंडुलानां विभागो न विधीयते। मध्यमादिविनि
योगवशेनैवार्थसिद्धत्वात् तस्तंडुलशब्देन प्रकृतहविस्त्रयमुपलक्ष्यतस्यापरित्यक्तयागानयस्य पूर्वदेवताभ्यो विभागोपनयो विधी
यते तत्रश्चापनीतानां देवतांतरसंयोगोपेक्षितो मध्यमादिश्चरणे विधीयते। मध्यमानां तंडुलानामग्निर्दाता। स्थविष्ठानां
धर्मेंद्रः प्रदाता। अणिष्ठानां मनस्य च विष्णुः। शिपिविष्टः न चानेकार्थविधानं दातृप्रदातृशिपिविष्टशब्दानां यौगिकानां श्रु
तेवाग्न्यादिपदसामानाधिकरण्यात् पदद्वयप्रतिपादितं विशिष्टं देवताकारकमेकेन विधिना शक्यं विधातुं। आपुदपे
ष्टिप्रकरणे च सहश्रयपतीति वचनमस्ति तेन न संप्रतिपन्नदेवताकयोर्दधिपयस्तद्विषयोः श्रतानि षयोश्च सह पाकाद
र्थप्राप्तं चरुत्वं दधिश्रृतयोश्चाधिकरणत्वमिहानूद्यते तस्माद्वाक्यभेदद्वयसकर्मांतरत्वं। एवं चार्तवनाभ्यासदर्शनमु
पपन्नं भवति। तथाहि श्रूयते। यदि बिभियाद्भिमी देष्यतीति महारात्रे हवींषि निर्वपेत् फलीकृतैस्तंडुलैर्हयासीता अर्ध
न यपभ्युदियात् तेनार्तं व्यप्रचरे यदि न प्रातरन्येषु रेतेन ब्राह्मणं भोजयेदिति। न यदि कर्मांतरमभ्युदयेष्टिः स्यात तस्त

म ६

त्रद्धिश्रयनयोरधिकरणत्वेन प्रणीताकार्ये विधानादुपादेयत्वेन प्रकृतग्रहणप्रमाणाभावाल्लौकिक एव दधिश्रयणं कृत्वासा
यंदोहेनाकालेपिप्रक्रांतेनप्रायश्चित्तनिर्वर्तितकालापराधदोषेणैकांतरितोपि दर्शः कर्तव्योनदध्यंतरमुत्पाद्य। तत्रातंचन
मनर्थकं। तत्र प्रक्रांतस्य दध्नस्त्यागे दध्यंतरोत्पादे चादृष्टद्वयं कल्प्यं। अस्मत्पक्षे तु तेनैव प्राक्प्रक्रांतस्य प्रयोगस्यानुष्ठितत्वाद
वश्यंभ्योरध्यंतरमुत्पाद्यमितिसर्थवदातंचनं तत्र सायंदोहार्द्धनैवातंच्यात्रान्येनेत्येतावद्विधेयकार्यमितिलाघवं। तस्मादकर्मा
तरं। उपांशुयाजे अवचनात्तथा प्रकृति॥ नन्वेवं चिंता किमुपांशुयाजद्रव्यस्याज्यस्य प्राकृतीभ्यो पनयो नेति। अमा
वास्यायामप्युपांशुयाजोस्तीति कृत्वा चिंतेयं। न त्वमावास्यायामुपांशुयाजोस्ति। वाचनिको हि तस्य पौर्णमासीकालः
। उपांशु पौर्णमास्यां यजन्निति कालविधिपरं हीदं वचनमिति सूत्रकारस्थितिः। तदुक्तं सूत्रकारेणामावास्यायामुपांशुया
जमनिच्छता। तदेव पौर्णमासीविधिपरत्वेनोपन्यस्तमिति। तथा च त्रयोदशामावास्यायामिति लिंगमुपपद्यते अन्य
था चतुर्दशत्वापत्तेः तदप्युक्तं। पौर्णमास्यां पराणि स्योहुदर्शविषये सदा। प्रधानाङ्गतयः संति तदा संख्योपपद्यते इति

शा० ।तस्मात्कृत्वा चित्ते वेयंउवर्षास्तुवन्ति कारो व — चन्नास्त र्णमावास्यायामप्युपांशुयाजो विहित इति तदभिप्रायेणेयं चिन्तेत्याह।
२८ तत्राज्यस्य देवतान्तरसंयोगावचनान्नमाकृतीभ्यो पनयनं तंडुलग्रहणेन तु प्रकृतहविर्मात्रस्य प्राकृतीभ्यो पनयविधा
नादाज्यस्याप्यस्त्वेवापनयस्तच्चताभ्यो पनीतं देवतान्तरेणावचनाभावादसंपृक्तं प्रहीणं भवति। नचे देवताभावे यागः संभव
तीत्यत्रपांशुयाजो लुप्यते। निरुप्तस्यानत्संयोगात्॥ ॥यदा तिरुप्ते हविषि चंद्राभ्युदयो ज्ञायते तदैवं किंमापश्चितं। उतक
र्मोपक्रममात्र इति। तत्रावश्यं तावद्धविषा चंद्राभ्युदयो विशेष्यः नचतदुदासीनं तस्य विशेषणं भवतीत्यवश्यं पाका
चिन्निर्वापापेक्षिता तत्र निर्वापस्य श्रुतत्वान्निर्दिष्टमेव हविरभ्युदयविशेषणमिति नानिरुप्ते प्रापश्चितं। नेवं। हविरभ्यु
दिया दिसेनावतैवाप्रवृत्तस्याभ्युदयसंबंधासंभवात्प्रवृत्तं हविरिति ज्ञायते तावताच निमित्तत्वोपपत्तेरविवक्षितो हविरूप
पत्तवन्निर्वापः। तस्मात्कालप्रवृत्तिमात्रं निमित्तमिति प्रागपि निर्वापादभ्युदये ज्ञाते कर्तव्यमेव नैमित्तिकं॥ ॥अनिरुप्ते
भ्युदिते प्राकृतीभ्यो निर्वपेद्द्वियाश्मरथ्यस्तंडुलभूते व्यवयनयात्। कर्मप्रवृत्तिमात्रं निमित्तमिति स्थितं। नैमित्तिकस्तद्दे राम २८

वतापनयोर्देवतांतरसंयोगश्चक्रियिनिर्वापश्चितरकालंतंडुलावस्थेहविषिकर्तव्योनिर्वापस्तुप्राकृतीभ्यएवस्यात्तत्तानेप्यभ्युदये
उतवैकृतीभ्यएवनिर्वापइतिसंशये।तंडुलग्रहणानंतरवस्थस्यैवापनयःनेतरदेवं।हविर्मात्रोपलक्षणार्थंतंडुलग्रहणंनस्व
रूपेणविवक्षितं।तद्विवक्षायांहिदधिभृतपोरपनयार्देवतांतरसंयोगवचनमनुपपन्नंस्यात्तस्मात्प्राङ्निर्वापादभ्युदयेवैकृ
तीभ्यएवनिर्वापः॥ ॥विनिरूप्तेचतुर्मुष्टीनामपनयस्तद्ग्रहणत्वात्।एकस्मिन्नृपोर्वामुष्ट्योःप्राकृतीभ्योनिरूप्तयोःपराभ्युदयोवगम्य
तेकिंतदाशेषंप्राकृतीभ्योनिर्वप्तव्यंउतवैकृतीभ्योऽथवाकृत्स्नमितिसंशयेप्राकृतीनांप्रवृत्तत्वात्ताएवावशिष्टेपिस्युर्निमित्तानंत
रंनैमित्तिकोपनयःसंयोगश्चकर्तव्यस्तस्माद्वैकृतीभ्यःशेषंस्यात्।सत्यंनिमित्तानंतरंनैमित्तिकं।तत्रविभागस्यसंयोगमात्रापेक्षि
त्वेनावयवेपिसंभवादवशिष्टोनिर्वापांशःप्राकृतीभ्यस्तावदपनेतव्यइत्येतद्गृह्णीमः।वैकृतीभिस्तुसंयोगोस्यामवस्थायांन
संभवतिताहिप्राकृतीनांस्थानेसंबध्येरन्।परार्थेनचप्राकृतीनांसंयोगोविहितोनावयवेनतेनवैकृतस्यापियदार्थेनसंयोजपि
तव्याःनावयवेन।नचसामिकृतेनिर्वापेवैकृतीनांपदार्थसंयोगःसंभवति।तस्मात्प्राकृतीभ्योपनीतोवैकृतीभिश्चासंपु

न्या० कोविशिष्टोनिर्वापांशस्तूष्णींकर्तव्यः॥ ॥सान्नाय्यसंयोगान्नासन्नासयतःस्यात्॥ ॥किमियमभ्युदयेष्टिःसन्नयतएवास्याउ
२९ तासन्नयतोपीतिसंशयेशृतेचरुंदधनिचरुमितिश्रवणात्सन्नयतश्चदधिशृतयोरभावान्नास्तिनैमित्तिकेसामर्थ्यं।तस्मा
त्सन्नयतएवाधिकारः।सत्यंयदिदधिशृतेचरोरधिकरणत्वेनचोद्येयातांनत्वेवंवाक्यभिदप्रसंगात्।नह्येकवाक्यस्यविशिष्टां
५१ स्तंडुलानुद्दिश्यदेवतांतरंदध्यधिकरणत्वंचशक्योतिविधातुंश्रुतस्तंडुलान्दधिशृतेचोद्दिश्यदेवतामात्रंविधीयतेनचोद्दे
श्यानांसाहित्यंविवक्षितं।अतोसन्नयतोदधिशृताभावेपितंडुलानांदेवतांतरसंयोगःकर्तव्यः।साम्युत्थानेविश्वजितक्री
तविभागसंयोगात्॥ यदिसत्रायदीक्षितानांसाम्युत्तिष्ठासेत्सोममपभज्यविश्वजितायजेतेति।किमयंविश्वजित्क्रीतराजक
स्यैवोत्थानेउताक्रीतराजकस्यापीतिविचारः।नैमित्तिकमिदंसोमविभागेनविशेषितं।नाक्रीतराजकस्यैतच्छक्यंक्रीतेभवेदतः
।उच्यते।यदिसोमविभागोयमंगत्वेनविधीयते।ततवंभवेदेषत्वर्थप्राप्तोनचोद्यतेक्रीतराजकस्यतावदर्थप्राप्तःसोमविभा
गोर्थांतरविभागवन्नविधातव्यः।अक्रीतराजकस्यतशक्यत्वादेवाविधोविभागः।तस्माद्भागप्राप्तद्रव्यविभागानुवादमा राम २९

त्रमिदंसोमग्रहणंनप्रदर्शनार्थंविश्वजिन्मात्रंतुविधीयतइत्यश्रीतराजकस्यापिस्यात्।दीक्षापरिमाणेयथाकाम्यविशेषात्
।नैमित्तिकप्रसंगाद्दीक्षानिमित्ताधर्माःकियंतंकालमनुवर्तेरन्नित्येवमर्थंदीक्षापरिमाणंचिंत्यते।ज्योतिष्टोमेश्रुतानामेकादीक्षा
तिस्रोदीक्षाइत्येवमादीनांसर्वेषांकिंज्योतिष्टोमविकल्पेननिवेशःउतद्वादशपरिमाणमेवतत्रस्यादेकादीनांनुत्कर्षोविकृतिष्वि
तिसंशयः।तत्रभाष्यकारोयथाकाम्यविशेषादित्यनेनपूर्वपक्षमुक्त्वाद्वादशपरिमाणमेवसिद्धांतितवान्।वार्तिककारस्त्वयुक्तमिद
मितिमत्वासूत्रद्वयमपिद्वयोरधिकरणयोरुत्सूत्रपूर्वपक्षयोःसिद्धांतसूत्रत्वेनव्याचख्यौ।तत्रश्रुतिवचनसामर्थ्यान्निद्वादश
हापरिमाणंमन्वानस्योत्तरंनहिप्रत्यक्षश्रुतानामेकादिपक्षाणांश्रुतिवचनवचनवशेनदौर्बल्यंयेनतदनुग्रहार्थमनुरुध्येर
न्।तस्माद्यथाकाम्यवत्स्यात्।श्रुतिवचनंतुद्वादशपक्षेभविष्यति।यद्वादीक्षितोभवतिश्रवीतेसेनावाद्विधीयतेद्वादशग्रहणंतुप्रदर्श
नार्थमितिव्याख्येयं।द्वादशाहस्तलिंगात्स्यात्।द्वादशाहेकिंदीक्षापरिमाणानांविकल्पःअथवाद्वादशपरिमाणमेवेति।प्रकृ
ति।प्रकृतिवद्विकल्पप्राप्तउच्यते।षट्त्रिंशदहोवारा।षयत्द्वादशाहइतिलिंगादुपसत्सुत्यानांचप्रतिस्वंद्वादशत्वाद्दीक्षाअपि

ग्रा० द्वादशेतिगम्यते।तथाभीघृतरावदीक्षामिरितिदीक्षाबहुत्वव्याख्यायतद्वाक्यशेषेद्वाभ्यांलोमावद्यतिद्वाभ्यांत्वचंद्वाभ्याममसृक्द्वा
३० भ्यांमांसंद्वाभ्याममस्थिद्वाभ्यांमज्जानमितिषण्णांद्विकानामनुक्रमणाद्द्विधुद्देशगतंबहुत्वंद्वादशत्वेवस्थाप्यतेपौर्णमास्या
मनियमोविशेषात्॥दीक्षार्णमास्यैदीक्षेरन्तेषामेकाष्टकायांक्रयुःसंपद्यतइति।तत्रविचारःकिमेषायाकाचित्पौर्णमासी
30 किंवानंतरश्रुताचैत्रीउतमाघीनितत्राविशेषाद्याकाचित्स्यात्चैत्रीस्तुतिस्तुरतितस्मादविशेषःसत्यमेकाष्टकाशब्दोविन
शेषकःचैत्र्यास्त्वनंतरमेवकार्तिकत्वात्सामान्यविषयःपौर्णमासीशब्दस्तद्विषयोभवतितस्माच्चैत्रीस्यात्तस्मादेतदेवंयद्येका
ष्टकाशब्दःसर्वत्रदीक्षामुक्तातत्रदोषमभिधायांतेचतुरहेपुरस्तात्पौर्णमास्यैदीक्षेरन्नित्युक्तादीक्षातःप्रस्तुतामेका
ष्टकांक्रयसंपत्त्यानुगृह्णातितेषामेकाष्टकायांयज्ञःसंपद्यतेतेनैकाष्टकांनछंबट्कुर्वंतीतिसंवत्सकाष्टकायांदीक्षंतेभ्य
न्नामानावृतंभवतरतिशिशिरगतामष्टमीमेकाष्टकांदर्शयतितस्मात्माघ्याःपौर्णमास्याःपुरस्ताच्चतुरहेप्रसंगादिद राम
मधिकरणंगवामयनेचित्रार्णपौमासेदीक्षेरनमुखंवाएतत्संवत्सरस्ययच्चित्रापूर्णमासस्तत्रनकाचननिर्माभवतीसेवंचै ३०

त्रिंस्तुत्वा न तउक्तं च तु रहे पुरस्तात्सौमेकाष्टकापरस्यात्स्यत्वात्तथा हि श्रूयते द्वादश पौर्णमास्यो द्वादशैष्टकौका एकाष्टकायां दीक्षेर
न् एषा वै संवत्सरस्य पत्नी ति तस्यां स्तु सुमंगली ति किं चार्तवा एते संवत्सरस्याभिदीक्षंते य एदि प्रागवभृथात्॥ तत्र प्रतिहोमो
न विद्यते यथापूर्वेषां॥ अवभृथोत्कर्षकृता दीक्षानुवृत्तिः पुरुषापराधकृता न विधिकृता। अतस्तत्काले पुरुषापराधकृतमग्नि
होत्राननुष्ठानमिति प्रतिहोमः कर्तव्यः॥ मैवं॥ यथा तथा वा दीक्षा तावदनुवृत्ता वर्त्ता या नाधिकारादग्निहोत्रकं मंतव्यं। कर्तव्यात्व
र्तव्याकरणे च प्रतिहोमः। तस्मान्न प्रतिहोमः॥ ॥प्रतिषेधश्चोर्ध्वमवभृथादेष्टः॥ ॥कृतेवभृथे यद्युदवसानीयोत्कर्षो दैवाद्भ
वति तदाकमग्निहोत्रं कर्तव्यमकरणे च प्रतिहोमः स्यादथवा न कर्तव्यं प्रतिहोमश्च न कर्तव्य इति। तत्रावभृथस्य दीक्षोन्मोचन
त्वात्तदुत्तरकालं कर्तव्यमग्निहोत्रमकरणे च प्रतिहोमः स्यात्। सत्यं दीक्षा निवृत्ता तथाप्येतया पुनराधेयसंमितयेष्ट्या ह्यग्नि
होत्रं जुहोतीति वचनेन कृतोदवसानीयस्याग्निहोत्राधिकार इति प्रतिपादनात्ततः प्रागधिकाराभावादकर्तव्यमग्निहोत्रं
अकृते च प्रतिहोमः। प्रतिहोमश्चेत्सायमग्निहोत्रप्रभृतीनि हूयेरन् प्रातस्त्वेषोऽदर्शिनी। कृत्वान्निति तयोः। यदि प्रतिहोमाः

ग्रा० स्फुः कस्तेषां क्रम इति। युगपदुपस्थितानामनियमः। येनैव क्रमेणापन्नास्तेनैव कर्तव्यास्तेनाग्निहोमादिषु सायमग्निहोत्र
३१ प्रभृतयः प्रतिहोमाः षोडशिनि प्रातः प्रभृतयः प्रायश्चित्तमधिकारे सर्वत्र शेषसामान्यात्॥ ॥गतं प्रासंगिकं पुनः प्राय
श्चित्तमनुसंधत्ते। दर्शपूर्णमासयोः श्रुतो भिन्ने जुहोतीति होमः किं यत्र यत्र भेदस्तत्र सर्वत्र स्यात्। उत प्रकरणे एव निविशत
31 इति संदेहे वाक्येन यावन्निमित्तं नैमित्तिकं गम्यमानमशक्यं प्रकरणेन प्रकृते व्यवस्थापयितुं। तस्मात्सर्वत्र स्यादिति मन्वा
नस्योत्तरं। नैमित्तिकस्यापि तावदवश्यं फलेन भवितव्यं। तदभावे विध्ययोगात्। तत्राप्रतीतफलकल्पनातः प्रकृतवा
मेकवाक्यत्वेनैव बलीयसीति तत्रैव निवेशः। व्यापन्नस्याप्सु गतो यदभोज्यमार्याणां तत्प्रतीयेत। व्यापन्नमप्सु प्रहरती
ति श्रूयते। तत्र व्यापन्नशब्देन किमुच्यत इति प्रश्ने नैवोपक्रमः। तत्रोत्तरं। यदार्याणामभोज्यं केशकीटाद्युपपन्नादि तद्व्या
पन्नादि प्रतीयेत॥ ॥विभागश्रुतेः प्रायश्चित्तं योगपद्येन विद्यते। ज्योतिष्टोमे यदि बहिष्पवमानं प्रसर्पतां प्रतिहर्ता राम
पच्छिद्येत सर्ववेदसं दद्यात्। यद्युद्गाताऽपच्छिद्येताऽदक्षिणं तं यज्ञमिष्ट्वा तेन पुनर्यजेत तत्र तद्दद्याद्यत्पूर्वस्मिन्दास्यन्स्यादिति। तद ३१

रोद्गात्प्रतिहार्त्रोर्युगपदपच्छेदोभवतितदाकिंप्रायश्चित्तंकर्त्तव्यंनवेतिसंशयस्तत्रोभाभ्यांक्रियमाणोपच्छेदोनैकेनान्यपरेषु
शक्यतेतस्माद्यौगपद्येनिमित्तविघातात्प्रायश्चित्तंनकर्त्तव्यं।स्यादेवंयदिकर्त्तृत्वंसापेक्षमुभयोर्भवेत्।एकैकस्यतुयत्नेननिरपे
क्षेणजायते।विच्छेदस्तेनकर्त्तृत्वंद्वयोःप्रत्येकमस्तिनः।कालमात्रंतुतःत्वेकंप्रायश्चित्तमतोभवेत्॥ ॥तत्रविप्रतिषेधाद्विक
ल्पःस्यात्।यौगपद्येप्रायश्चित्तद्वयमापतति।तत्किंसमुच्चीयतेथविकल्प्यतइतिविचारः॥ ॥तत्रविकल्पस्यन्याय्यत्वात्तेनपु
नपुनर्यजेतेतिप्रयोगद्वयप्रसंगात्पूर्वस्मिन्नसर्ववेदसमित्युभयसंभवात्समुच्चयः।नैतद्युक्तं।यत्रहिप्रयोगेनिमित्तंतस्यैवनैमि
त्तिकंप्रायश्चित्तमंगंनप्रयोगांतरेक्रियमाणेनप्रायश्चित्तेननिमित्तवतःप्रयोगस्यसाद्गुण्यंभवति।तस्मादेकस्मिन्नेवप्रयोगे
द्वयमापतितमशक्यंसमुच्चेतुमितिविकल्पः।पौर्वापर्येपूर्वदौर्बल्यंप्रकृतिवत्।पश्चानुपूर्व्येणोद्गात्प्रतिहार्त्रोरपच्छेदोभवति
तदाकिंपूर्वोत्पन्ननिमित्तंप्रायश्चित्तंकार्यमुतोत्तरनिमित्तमितिसंशयः।तत्रपूर्वनिमित्तमसंजातविरोधंनिर्विघ्नमवाप्य
तेनहिरुद्धत्वात्शक्यमवगंतुमुत्तरमतःपूर्वबलीयस्त्वमेवप्राप्तमुच्यते।नात्रपूर्वेणोत्तरस्यज्ञानस्योत्पत्तिःशक्यतेनिरोद्धुं

ग्रा० त्यक्षेण वाक्येन तत्स्वरूपमुत्पाद्यत एव। न ह्युपजायमानं स्वविरुद्धं पूर्वविज्ञानं बाधमानमेवोत्पद्यते। तेनोत्पन्नमपि पूर्वं प्रायश्चित
३१ ज्ञानं मिथ्या भवति। बाधितत्वादुत्तरस्य तु न किंचित् बाधकमस्ति। नहि पूर्वविज्ञानमुत्तरबाधेनोत्पद्यते तस्यामवस्थायामुत्तरस्या
नुपजातत्वात्। जाते तूत्तरविज्ञाने जायमानेनैव तेन बाधितं पूर्वविज्ञानमसत्वान्नोत्तरं बाधितुं क्षमते। तस्मात्पूर्वदौर्बल्यं। नैमि
33 त्तिकशास्त्राणां त्वयमर्थः निमित्तोपजननात् प्रागन्यथा कर्तव्यो यः क्रतुर्निमित्ते सति अन्यथा कर्तव्य इति। ततश्च यथा। नित्यद्वादश
शतज्ञानमुत्पन्नं पाश्चात्येन नैमित्तिकेन सर्ववेदसदानादिज्ञानेन बाध्यते तथा नैमित्तिकमपि पूर्वनिविष्टमुत्तरेण बाध्य
ते यद्युद्गातापच्छेदः स्यात् पुनर्यज्ञे सर्ववेदसं दद्यात् यद्येतरस्मिन्। पौर्वापर्ये जघन्यनिमित्तकं प्रायश्चित्तमिति स्थितं। तद्यदो
द्गाता जघन्यो भवति किं पुनर्यज्ञे सर्ववेदसं देयमुत द्वादशशतमिति संशयः॥ तत्र यत्पूर्वस्मिन् दास्यन् स्यादिति यदेव क्रतुख
भावतो देयं तदेव प्रतीयते तच्च द्वादशशतं तस्मात्तदेव पुनः प्रयोगे देयमित्येकः पूर्वः पक्षः पूर्वस्मिन् प्रयोगे प्रथमं द्वादश
शतं दास्यन्नासीत् प्रतिहर्तरि त्वपच्छिन्ने सर्ववेदसमुत उभयमपि पुनः प्रयोगे यत्पूर्वस्मिन् दास्यन् स्यादिति शक्यं वक्तुं। त एम ३१

स्माद्विकृत्यइतिद्वितीयःसिद्धांतस्तुद्वादशशतंसर्ववेदसेनबाधितंप्रतीतंनतदास्यनभवति।तस्मात्तदेवपुनःप्रयोगेस्यात्।न
नुतरथ्यदाक्षिण्येनबाधितंनेतिब्रूमः।नत्वहात्रपक्षेदेनपूर्वदक्षिणाबाध्यतेकिंतर्हिपूर्वस्मिन्प्रयोगेदातव्यासतीदक्षिणाततउ
त्कृष्यातरस्मिन्प्रयोगेनिक्षिप्यतेपूर्वप्रयोगेचोद्धात्रपक्षेदवेलायांद्वादशशतंबाधित्वासर्ववेदसमेवदातव्यमासीत्।अतस्तदे
वपुनःप्रयोगेदेयं॥ ॥अहर्गणेयस्मिन्नपच्छेदस्तदावर्त्तनंकर्मपृथक्त्वात्॥द्वादशाहादिष्वहर्गणेषुयदाकस्मिंश्चिदहन्युद्गात्रप
च्छेदोभवतितदाकिंकृत्स्नस्याहर्गणस्यावृत्तिरुततदेवाहरावर्त्ततेतिसंशयेसाधनानिवेशित्वादुर्माणांगणस्यचसाधनत्वात्तस्ये
वादक्षिणस्यसंस्थापनंपुनःप्रयोगश्चेतिप्राप्तेभिधीयते।अशावृत्वात्तस्मूहस्यनफलंप्रतिचोदना।यागस्यचोदनातत्रयागाः४
प्रत्येकमेवते।अतोमिथोनपेक्षास्तेयागाःस्वांगसमन्विताः।फलंसंहृत्यकुर्वंतिसापूर्वद्वारमाश्रिताः।तेनयस्मिन्नपच्छेदस्तदाहृ
तिगुणान्वितं।अनाहृतिगुणैरन्यैःसंहृत्यकुरुतेफलं।इतिषष्ठस्यपंचमःपादः॥ ॥संनिपातेवैगुण्यात्प्रकृतिवत्तुल्यकल्पाय
जेरन्।दर्शपूर्णमासयोःपुरुषभेदेनकल्पभेदःसमाम्नातः।राजन्यवासिष्ठादीनांनाराशंसोद्वितीयःप्रयाजस्तनूनपादन्येषामि

शा० स्यादिः सर्वाक्षणीयादिघृतिरिश्वः सत्रेष्वनेककर्तृकेषु प्राप्तस्तत्र संदिह्यते किं भिन्नकल्पा अपि संहृत्य सत्रमासीरन् उत तुल्यकल्पा एवे
३३ ति नदर्थमिदं विचार्यते। किं वासिष्ठादयो नाराशंसाद्यंगत्वेन कर्त्तारो विधीयंते उत वासिष्ठादीनुद्दिश्य नाराशंसादि तादर्थ्येन विधी
यत इति। तत्र वासिष्ठार्थत्वेन विधाने फलकल्पनात् प्रकरणबाधाच्च वासिष्ठादय एव नाराशंसाद्यंगत्वेन विधीयंते षष्ठी च संबं
33 धवाचिनी सत्रेषु च सत्रिणां प्राप्त्येकमेव कर्तृत्वमिति स्थितं अतस्तत्र वासिष्ठा वासिष्ठैः क्रियमाणो नाराशंसो वासिष्ठेनापि
तावत्क्रियत एवेति अविगुणस्तनूनपादप्यन्यैरतो यं कंचित्कल्पमाश्रित्य भिन्नकल्पा अधिक्रियेरन् इत्येवं प्राप्ते ब्रूमः। वासि
ष्ठादीनस्वामित्वेनोद्दिश्य तादर्थ्येन नाराशंसादि विधीयाने तादर्थ्यं च क्रतूपकारद्वारेणाप्युपपन्नमिति फलकल्पनापत्तिः। ए
वं च धात्वर्थस्यान्यत्र विधानात् संनिकृष्टार्थविधिर्भवति। प्रयाजोद्देशेन तु वासिष्ठविधौ धात्वर्थेनास्य विधानाद्विप्रकृष्टार्थ
विधानं अतः सत्रेष्वन्तरकल्पाश्रयणे अन्येषां तेन क्रतूपकारालाभाद्विगुणः क्रतुर्न फलं साधयेत्। तस्मात्तुल्यकल्पानामे
वाधिकारः॥ ॥वचनात्तु द्विसंयोगस्तस्मादेकस्य पाणित्वं। एतेन राजपुरोहितौ सायुज्यकामौ यजेयातामित्यत्र संशयः। किमयं एम ३३

षष्ठीतत्पुरुषैकशेषः। राज्ञः पुरोहितौ राजपुरोहितः राजपुरोहितश्च राजपुरोहितश्च राजपुरोहिताविति। ततश्च राजद्वयसंबं
धिनोर्द्वयोः पुरोहितयोरधिकार उक्तैकशेषेणोत्तरपदेन तत्पुरुषो राज्ञः पुरोहितौ राजपुरोहिताविति। ततश्चैकराजसंबंधि
नोर्द्वयोः उत कर्मधारयः। राजात्मकौ पुरोहिताविति। अथवा द्वंद्वो राजा च पुरोहितश्चेति। तत्र युगपदधिकरणे द्वंद्वः तेन पद
द्वयमपि लक्षणा इति स्यात्। अतस्तत्पुरुषाद्यं समासात्परत्वमाद्विवचनं तदर्थस्यैव द्वित्वमाह। तस्माद्राजद्वयसंबंधिनो द्वौ। म
द्वौ पुरोहितपदात् द्विवचनं तदर्थस्यैव द्वित्वमाह। राज्ञः पुरोहितौ द्वाविति। एतस्मिंस्तु पक्षद्वयेऽपि पूर्वपदे लक्षणा इति स्यात्
।किंच नैकस्य राज्ञः पुरोहितद्वयमस्ति। पुरोहितं वृणीत इत्येकधारीयमानस्यैकत्वस्य विवक्षितत्वात्। प्रथमपक्षे राजपद
मनर्थकं। राज्ञ एव पुरोहितोऽस्ति नान्यस्य। अतो व्यभिचाराद्विशेषणं सदनर्थकं राजपदं स्यात्। अतः कर्मधारयोऽस्तु। सोऽपि न।
राज्ञः पुरोहितत्वाभावात्। ब्राह्मण एव पुरोहितत्वेन वरणीय इति श्रूयते। तस्मात् द्वंद्व एवायं। न च तत्रैकस्यचिल्लक्षणा यु
गपदधिकरणे द्वंद्व इत्यस्यापवादारीसनं तंत्र रते। तस्माद्राज्ञः पुरोहितस्य चात्राभिन्नकल्पयोरेवसातो वचनादधिकारः।

श्रा०
३४
34

सत्राण्यपि सर्ववर्णानामविशेषात्। सत्रेषु किं त्रयाणामपि वर्णानामधिकारः उत ब्राह्मणानामेवेति विचारः। तदर्थं च किं ये यज
मानास्त ऋत्विज इत्यनेनार्त्विज्यं यजमानसंस्कारत्वेन विधीयते। उत यजमाना आर्त्विज्यांगत्वेनेति चिंत्यते। सत्राणि सर्ववर्णा
नामेव पुरुषविशेषतः ऋद्धिकामादिवाक्येषु विशेषः श्रूयते नहि। प्राप्तेषु त्रिषु वर्णेषु यत्नाच्छेदेनोपबंधनात्। संस्कारार्थतया तेषा
मार्त्विज्यमुपयुज्यते। प्रधानभूतैरेव चतैः क्रियमाणमार्त्विज्यं न गुणभूतान् ध्वपूर्वकर्तृन् पेक्षते। गुणभूतकर्तृपरिच्छेदेन ब्रा
ह्मण्यमार्त्विज्यांगं तदभावेन तृपि द्वाराभावान्न सत्रे प्राप्नोति। तस्मात्त्रयाणामधिकार इति प्राप्ते ब्रूमः॥ नार्त्विज्यं यजमानानां
संस्कारत्वेन चोद्यते। तथा सत्यप्राकृतं कार्यमार्त्विज्यस्य प्रसज्यते। तेन यच्छब्दयोगेपि नोद्देशः स्वामिनामिहार्त्विज्यमेव
तु रिश्य यजमानविधिर्भवेत्। प्रकृतितश्च द्वौ धर्मावार्त्विज्यांगत्वेन प्राप्तौ। अन्यकर्तृकता ब्राह्मणकर्तृकता च तत्रान्यक
र्तृकाये यजमानास्त ऋत्विज इत्यनेन बाधिता ब्राह्मणकर्तृकतायास्तु न किंचित्बाधकमस्ति ऋद्धिकामादिशब्दानां ब्राह्म
णानामविरोधात्। तस्मात्प्रकृतितः प्राप्तं ब्राह्मणकर्तृकत्वं वाचनिकं च यजमानकर्तृकत्वमुभयं संपादयितुं ब्राह्मणाए राम ३४

वसत्राण्यासीरन्निति॥ ॥वासिष्ठानांब्रह्मत्वस्यनियमात् ब्राह्मणानामपिकिंसर्वेषामधिकारःउतवासिष्ठानांतत्समानक
ल्पानांच।अथवावैश्वामित्राणांतत्समानकल्पानांच।अथवावैश्वामित्राणांतत्समानकल्पानांचेतिसंशयः।तत्राविशेषात्सर्वे
षांवासिष्ठोब्रह्मेतिस्मृतौश्रवणात्ब्रह्मत्वस्यावैगुण्यायावश्यंवासिष्ठेनभवितव्यं।अतस्तत्समानाकल्पानामधिकारः।य
एवकश्चित्स्तोमभागानधीयीतसएववासिष्ठइत्यागतिश्रुत्यापिस्तोमभागविदोब्रह्मत्वस्यानुज्ञानान्नावश्यंभावीवासिष्ठःवै
श्वामित्रोहोतेतिवचनात्हौत्रमवश्यंवैश्वामित्रेणैवकर्तव्यं।नचभिन्नकल्पानामधिकारोस्तीतिस्थितमाद्ये।तस्माद्वैश्वामि
त्रस्यतत्समानकल्पानांचसत्रेधिकारः॥विहारस्यप्रभुत्वादग्नीनामपिस्यात्॥ ॥किमनाहिताग्नीनामपिसत्रेप्यधिकारः
अथाहिताग्नीनामेवेतिसंशयः।तत्राग्नीनांपरार्थत्वाद्यस्यकस्यचिदग्निषु।साधितंकर्मसर्वेषांफलंसाधयतिध्रुवं।औदुंब
रीवयेनकेनचिद्यजमानेनसंमिता।तस्माद्येनकेनचिदाहिताग्निनासंगत्यानाहिताग्नयोप्यासीरन्।मैवं।दृष्टिपूर्वकृतासोम
विकारात्मवस्थिता।दृष्टोचानाहिताग्नीनांनकथंचिदधिक्रिया।आधातुरग्नयःकार्यंनान्येषांसाधयंतिच।उपस्थहविशेषे

शा० णकर्तुरेवफलान्वयात्। आरधीनत्वात्मनेपराराधानुरेवफलेनभवितव्यं। कर्मयोग्यताचाग्नीनांफलं। अतोऽस्येनाहिताअन्यस्यकर्म
३५ नसाधयंति। तस्मादनग्नीनामनधिकारः। यजमानसंमितोइंबरीतितुशास्त्रार्थोपिनकेनचिदपिप्रकृतप्रयोगगतेनयजमा
नेनसंपाद्यतइतिवैषम्यं॥ ॥जह्वादीनामप्रयुक्तत्वाद्यथाकामीप्रतीयते। जुह्वादिपात्रेचिंता। किंयस्यकस्यचित्सात्रैःसत्रं
35 प्रयोक्तव्यंउतान्यानिसाधारणान्यूत्पाद्यानीति। तत्राग्निवद्द्रयाग्रहविशेषविरोधाभावाद्यस्यकस्यचित्सात्राणिभवेयुः
।सत्यमपविरोधोनास्तिकिंत्वाहिताग्निमग्निमभिपद्मपात्रैश्चदहंतीति। तथादक्षिणेहस्तेजुहूमासाद्येदित्यादिवच
नैः पात्राणांदाहेगुणभावः सास्वप्रतिपत्तिश्चविधीयतेतद्यदिकस्यचित्सात्रैरुपक्रांतेप्रयोगेतस्ययजमानस्यदिष्टंग
तिःस्यात्ततस्तस्यसंस्कारःपात्राणांचप्रातीपत्तिर्हीयेतयदितुनेदीयेतप्रक्रांतःप्रयोगोविगुणःस्यात्। तस्मात्साधारणा
न्युत्पादयेरन्॥ ॥पुरुषकल्पेमनविकृतोकर्तृनियमःस्याद्यत्तस्यतद्गुणत्वादभावादितराननप्रत्येकस्मिन्नधिकारःस्यात्त्रिगा रम
र्ग्येप्याविवृत्॥ यस्मिंश्चिद्ध्वरकल्पादिषुसप्तदशसामिधेनीरनुब्रूयादितिश्रूयते। तासुकिंवैश्यस्यैवाधिकारोथत्रैमाणाम् ३५

पीतिसंशये दर्शपूर्णमासप्रकरणपठितेन समदर्शवैश्यस्येति वाक्येन सामदर्श्यांगत्वेन वैश्यो विधीयते कृतानित्यमकृतौ सा
मदर्श्यमस्तीति यत्राध्वरकल्पादौ तद्धिहितं तत्रैव वैश्यविधिः। तेन वैश्यकर्तृकसामदर्श्यांगत्वादध्वरकल्पादौ वैश्यस्यै
वाधिकारः। नैवं। प्रकृतौ हि श्रुतं वाक्यं ततो नोत्कर्षमर्हति। तस्माद्वैश्यानुवादेन सामदर्श्यं। विधीयते। तच्च वैश्यनिमित्तत्वा
त्सांचदर्श्यस्य बाधकं। विकृतेर्वचनैः सामदर्श्यं कृतांगमुच्यते तदनैमितिकत्वेन त्रयाणां न विशिष्यते। तस्मादध्वरकल्पा
दौ त्रयाणामधिकारिता॥ ॥इति शास्त्रदीपिकायां षष्ठस्य षष्ठः॥ स्वदाने सर्वमविशेषत्वात्। विश्वजिति सर्वस्वं ददातीति
श्रुतं। तत्र किं मात्रादीनामपि स्वशब्दवाच्यानां दानमुत धनस्यैव यत्रास्य स्वामित्वमिति संशये सर्वेषां स्वशब्दवाच्यानां दा
नमविशेषात् शक्यं ते च पित्रादयोपि परविधेयीकर्तुं परस्वत्वापादनं हि दानं। अतः पित्रादयोपि देयाः। नैतदेवं। न हि श
क्यं तेन दातुं। स्वत्वत्यागपूर्वकपरस्वत्वापादनं दानं न च दीयमानोपि पिता न पिता भवति यत्र तु मभुत्वयोगेन स्वशब्दवृत्तिः
स तच्छक्यं दातुं तस्मिन् हि दत्ते पूर्वस्य स्वामित्वं निवर्तते परस्य च स्वामित्वमुपजन्यते। किं चार्थं स्वशब्दोपि भिन्नया शक्त्या आत्म

शा०
३६
36

त्वीयत्वान्निधनेषु वर्तते तत्रैकस्मिन्प्रयोगेऽस्यैकरावार्थः तत्र धनस्य दानसंभवात्तद्विषय एव स्वशब्दः। तस्माद्धनस्यैव दानं न
पित्रादीनां। न भूमिः स्यात्सर्वान्प्रत्यविशिष्टत्वात्। येयं महापृथिवी सेयं देया न वेति। सा पित्सार्वभौमस्य धनमिति मन्यमानो
दानमाह। नासौ कस्यचित्स्वं राज्यं हि स्वविषयपरिपालनं कंटकोद्धरणं च नित्येन कर्षकादिभ्यः करादानं दंड्येभ्यश्च दंडादानमित्येता
वान्संबंधः न स्वामित्वमतो न सार्वभौमेनापि महापृथिवी देया। मांडलिकश्च मंडलं। अकार्यत्वात्ततः पुनर्विशेषः स्यात्। विश्व
जिति वनकेसरिणो ददाति निश्चितं तत्र केसरिणो दानं नेति विहितप्रतिषिद्धत्वात्पक्षे दानं। पर्युदासस्त्वं पंक्त्यपि तु वा भूमे
षः स्यादित्यनेन न्यायेन। अयं च तस्यैवापस्य प्रपंचः प्रसंगादिहोक्तः॥ नित्यत्वाच्चानित्यैर्नास्ति संबंधः॥ ॥ सर्वस्वं ददाति
ति किंपतत्पुरुषस्योपभोग्यं स्वं कुप्याकुप्यशयनासनगवादि तत्सर्वं ददातीति शास्त्रार्थः ततश्च यस्यापि यन्नास्ति सोऽपि
तदर्जयित्वा दद्यादित्यर्थस्याविधते तत्सर्वं ददातीति संशये यत्सर्वस्वं तद्दद्यादिति निश्चयः सर्वथा विधिलिप्सया दानविधिं मन्यते।
यो वकेन तु दानस्य प्राप्तत्वाद्यस्य यदस्ति तस्मिन्नद्यादश शतमात्रं दातुं प्रवृत्तः स न सर्वमिव दद्यादिति सर्वता विधीयते। किं एम ३६

वायं सर्वशब्दः प्रसिद्धस्वत्वेष्वेव सर्वेषूपपन्नत्वान्नासिद्धस्वत्वानामपि परित्यर्जनं। तस्मान्नार्ज्जयित्वा देयं॥ ॥शूद्रश्च धर्म
शास्त्रत्वात्। धर्मार्थी परिचारकत्वेन यजमानमुपस्थितो यः शूद्रः स किं देयो न वेति। सर्वशब्दानुग्रहात्परविधयीकरणसंभ
वाच्च देयः। स्वत्वाभावादनिष्टप्रापरवश्यत्वानभ्युपगमसंभवाच्चादेयः। दासस्तु देय एव। दक्षिणाकाले यत्स्वं तत्प्रतीयेत दानसंयो
गात्॥ ॥किं दक्षिणाकालात्प्रागेव प्राप्तोपयोगमपि धनमनुपयुज्य प्रयत्नेन धारयित्वा देयं यद्वापि भावित्वेन निश्चितं तदपि
देयमुत यावद्दक्षिणाकाले वस्थितं तदेव देयमिति संशये सर्वशब्दानुग्रहात्प्राक्तनभाविनोरपि दानं। दक्षिणाकालीन एव सर्वत्वोप
पत्तेर्न धारणप्रयुक्तिर्भाविनश्च तदानीं स्वत्वाभावादशक्यमेव दानं॥ ॥अशेषत्वात्तदन्तं स्यात्कर्मणो द्रव्यसिद्धित्वात्। प्रकृतो क
मारंभ एव त्रिधा यजमानेनात्मीयं धनं वचनबलाद्व्यवस्थापितं इदं मे भक्षार्थमिदं क्रत्वर्थमिदं दक्षिणार्थमिति। तत्र यद्दक्षिणार्थं त
न्मध्ये द्वादशशतं रत्नं रहतु किं त्रिविधमपि दातव्यं कर्मशेषं चोत्सृष्टव्यमुत यावता क्रतुशेषं निर्वर्तते तावच्छिष्टं ग्रन्थं तत्सर्वं दे
यमुत यद्दक्षिणार्थं निहितं तदेव सर्वं देयमिति संशये। प्रत्यक्षवचनादिष्टसर्वदानविरोधतः। चोदकप्राप्तं कर्मशेषं लुप्येत तु

शा० बलं। प्रधानत्वात्क्रतोर्न्नैर्गिष्ठादानं तद्बाधनक्षमं। किं चितु क्रतवेवं सर्वमिन्यत प्रदीयते। दक्षिणार्थेन निर्दिष्टं प्राप्तं द्रव्यमनूद्य तु
३८ ।विधेयं सर्वता मात्रं लाघवं हि तथा विधेः॥ ॥अहर्गणे च तद्धर्म्मः स्यात्सर्वेषामविशेषात्। अस्त्यष्टरात्रोहीनः तस्य विश्वजि
37 त्प्रथममहस्ततोभिप्लवः षडहस्ततोभिजित्तत्र विश्वजिति संशयः। किं द्वादशशतं दक्षिणा स्यादुत सर्वस्वं दक्षिणेति। तत्
त्रगणेषु द्वादशाहस्य विध्यन्तः स्यादयमिष्यते। द्वादशं च शतं ज्योतिष्टोमात्तत्रातिदिश्यते। विश्वजित्यपि सैव स्याद्दक्षिणाग
णवर्तिनी। नामातिदेशप्राप्तस्यात्सर्वस्वं त्वेव दक्षिणा। इदं च प्राप्तिमात्रपरमधिकरणं प्राप्ते विश्वजिति सर्वस्वं बाधित्वेतरे
षां सप्तानामह्नां द्वादशशतदक्षिणानां श्रेयसां सा धर्म्या यद्वादशशतमेयदेयमेकैव च तन्त्रेण सर्वेषामेकप्रयोगवर्तिनां द
क्षिणा न पृथक् पृथक् प्रदातव्या। तस्माच्छ्रेयोनुग्रहाय द्वादशशतमेव देयं। विकारः सन्नुभयतो विशेषात्। सर्वस्वदाने एव संश
यः। किं यस्य द्वादशशतान्न्यूनं धनं सोपि तावन्मात्रं सर्वस्वं दत्वाधिक्रियते उत यस्याधिकं स एवेति। तत न्यूनेधिके वापि सर्वं शेषप्र
तितत्र उभयोरधिकारः स्यात्न्यूनाधिकदायिनोः इदं तु प्रकृतेः प्राप्तं सर्वदानं नियम्यते। तत्र चानतिसिद्धार्थमपि कं सर्वमी॥२ एम ३८

तं। ज्योतिष्टोमे हि द्वादशशतं विधाय पश्चाद् उक्तं। यद्येतावता ऋत्विजो न नमेयुरपि सर्वस्वेनेति द्वादशशतादसिद्धां चाननतिं ततोधिक
मेव सर्वस्वं साधयितुं शक्नुयात् न न्यूनमतः प्रकृतो तावत् द्वादशशताधिकमेव सर्वस्वं यत्र प्राकृतं तस्यैव नियममात्रमिह क्रियते। त
स्मादधिकदानेनैवात्राधिकारः॥ ॥अपरिमाणे शिष्टस्य संख्याप्रतिषेधस्तच्छ्रुतित्वात्॥ ॥आधानेऽश्रुतं एकादेयाषदेयाद्वादशदेया
श्चतुर्विंशतिर्देयाः शतं देयं सहस्रं देयमपरिमितं देयमिति। तत्रापरिमितं देयमिति किं द्वेत्तिकादिपरिमाणप्रतिषेध उतायम
पि संख्यान्तरविधिरिति संशयः। तत्रावयवव्युत्पत्त्या परिमाणशून्यमुच्यते न च परिमाणशून्यस्य दानं संभवति। अतः प्रकृतप
रिमाणशून्यमुच्यते। ततस्तस्य प्रतिषेधः। उच्यते॥ बह्वर्थवचनोयं समुदायप्रसिद्ध्या। सा चावयवप्रसिद्धेर्बलीयसी। नचात्रध्या
त्मिकारूढिः सुज्ञातपरिमाणेष्वपि बहुत्वमात्रेणापरिमितशब्दप्रयोगात्। तस्मादयमपि संख्यान्तरविशिष्टदानविधिः॥ ॥
अनियमो विशेषात्। बहुत्वविधिरपरिमितशब्द इति स्थितं। किं तत्सहस्रान्न्यूनमधिकं॥ वा। उताधिकमेवेति संशये। अवर्गगपिब
हुत्वसंभवादनियमः। मैवं। आपेक्षिको हि बह्वर्थः सहस्रापेक्षया भवेत्। तस्यानन्तरनिर्देशात्सहस्रादधिकस्ततः॥ ॥परकृ

शा० तिपुराकल्पंमनुष्यधर्मःस्यादर्थायित्यनुकीर्तनं। दर्शपूर्णमासयो। श्रुतं। इतिहस्माहबद्धुवार्ष्णिर्माषानेवमत्यं पचतेतिसवि
३८ धिरर्थवादइतिसंशयेविधिरर्थकमित्यौडवराधिकाणपूर्वपक्षेस्थितं। तमेवपूर्वपक्षंमनुष्यधर्मःस्यादितिस्मारयित्वा कृत्वा
चिंतयाधिकारश्चिंत्यते। यदाविधिःतदाकिंवृष्णिगोत्राणामुतसर्वपुंसामिति। वार्ष्णिकर्तृकत्वसंस्तवात्तद्गोत्राणामेवस्या
त्। मैवं। स्तुत्यस्यविधिर्नस्तुत्युपायस्य। नचात्रवार्ष्णिकर्तृकोमाषपाकः। स्तूयते। अन्यस्यस्तावकस्याभावात्। किंतुवार्ष्णि
कृतत्वेनकारणेनमाषपाकस्यस्तुतिः। अतोमाषपाकमात्रविधानात्सर्वपुंसामधिकारःस्यात्। अर्थवादोवेतिकृत्वाचिं
ह्यारतं। सहस्रसंवत्सरंतदायुषामसंभवान्मनुष्येषु। पंचपंचाशतस्त्रिवृतःसंवत्सराः पंचपंचाशतःपंचदशाः पंचपंचा
शतःसप्तदशाःपंचपंचाशतएकविंशाःविश्वसृजामयनंसहस्रसंवत्सरमितिकिमस्मिन्सत्रेयेगंधर्वादयःसहस्रा
युषस्तेषामधिकारउतमनुष्याणामेव। यदामनुष्याणामेव। तदाकिंरसायनादिसंपादितसहस्रायुषां। उतकुलकल्पः
उतविश्वसृजामयनंकुर्वतांसहस्रायुष्टुं। अथवाइतितीपानांशतानामधिकारः। उतमासेषुसंवत्सरशब्दमाश्रित्यसत्र राम ३८

त्वेनायं मनुष्याधिकारः।उत द्वादशाहस्त्रिषु संवत्सरशब्दः।उत दिवसेष्विति पक्षाः तत्र मनुष्याणां सहस्रायुष्ट्वासंभवात्
अतिबलादृष्टं धवाधिकारः।तेषां त्वग्न्यूपसंहारसामर्थ्यान्मनुष्याणामेव रसायनलब्धसहस्रायुषां।रसायनस्यैतावदायुः
संपादनासामर्थ्याच्छितायुः पुरुष इति श्रुतेः कुलकल्पः।शास्त्रफलं प्रयोक्तरीति न्यायात्समग्रकर्मानुष्ठायिनां फलं नवि
कलानुष्ठायिनां।अतो न कुलकल्पः।सत्रारंभादेव तु सहस्रायुष्ट्वं कल्प्यतामिति इदमप्यर्थासंभवादनुपपन्नं तस्मात्संव
यं षाशीत इति यजमानाभिप्रायासंख्या।एकोऽपि त्रिवृत्स्तोमकृपाग युक्तः संवत्सरः पंचपंचाशत्संख्याकैः प्रत्येकं कर्तृ
भूतैः संबध्यमानस्तत्संख्यो भवति।तथा पंचदशाद्ययोपीति तेन चतुःसंवत्सरमिदं सत्रमधर्तितीयैर्यजमानशतैः क्रियमाणं
सहस्रसंवत्सरमिति कथ्यते।अयमपि पक्षो युक्तः बुधाबत्संतमनारूढश्चतुर्विंशतिपरमाः सत्रमासीरन्निति वचनविरुद्धो
ऽभ्युपगमः।तस्मात्संख्याशब्दः संवत्सरशब्दं वा गौणमाश्रित्यात्र मनुष्याधिकारः समाश्रयितव्यः।तत्रापि संख्याशब्द
स्य मुख्यत्वादेकार्थनिश्चयसामर्थ्याच्च न स्वार्थत्यागः।संवत्सरपदं तु जघन्यत्वात्सौरचांद्रमसाद्यनेकार्थसाधारणत्वेन

शा० वार्थनिश्चयासामर्थ्यात्क्षीणं भवति। तत्रयोमासःससंवत्सरइतिदर्शनान्मासेषुतत्राप्याशक्तिः तदवस्थैवनन्वाधानादूर्ध्वं
३९ सहस्रमासजीवनंसंभवतितस्मात्संवत्सरप्रतिमावैद्वादशरात्रयइतिप्रयोगाद्द्वादशरात्रिषुसंवत्सरशब्दःप्रतिमावि
39 शेषणंत्वत्रसंवत्सराशब्दः नतस्यद्वादशरात्रिषुप्रयोगः।तस्मात्त्रिवृदादिशब्दसामंजस्याद्दिवसेषुसंवत्सरशब्दः।त्रिवृ
दादिपदैःस्तोमविशिष्टमहरुच्यते।नाहःसंघस्तेनोहःसुगोणीसंवत्सराभिधा॥ ॥इतिशास्त्रदीपिकायांषष्ठस्यसप्त
मः॥ ॥इष्टिपूर्वत्वादक्रतुशेषोहोमःसंस्कृतेष्वग्निषुस्यादपूर्वोप्याधानस्यसर्वशेषत्वात्॥ ॥संतिचतुर्होतृसंज्ञकामंत्रा
स्तैर्जपहोमाःपुरुषार्थतयाविहिताः चतुर्होतारंप्रयुंजीतचतुर्होत्राप्रजाकामोजुहुयादितियेहोमास्तेकिमाहिताग्न्यधिका
एआहवनीयेकार्याउतानाहिताग्न्यधिस्यकारालौकिकेग्नौस्युरथवोभयाधिकाराइतिसंशयः तदर्थमिदंविचार्यते।ए
षावाअनाहिताग्नेरिष्टिरितिवचनंजयाभिप्रायमनुवादमात्रमनाहिताग्नेर्वाहोमेष्वधिकारप्रतिपादनपरमिति।तत्र राम
विध्यश्रवणादनुवादोजपविषयः।इष्टिशब्दश्चजयएवस्तुत्यर्थतयाप्रयुक्तस्तत्रैषावचनव्यक्तिः।येषानाहिताग्नेः ३९

क्रियाजपात्मिकासेष्टिरिति। सत्यमेषासंभवति। वचनव्यक्तिरियमयितुसंभवति। येषाचतुर्होतृहोमात्मिकेष्टिः सानाहिताग्नेरि
तिपूर्वस्यामाहिताग्न्यधिकारहोमाउत्तरस्यामनाहिताग्न्यधिकारः नचान्यतरस्यचनव्यक्तिर्निर्धार्यते। तस्मादुभयाधिकारइ
तिप्राप्तउच्यते। वचनस्यार्थवत्वायानाहिताग्नेरधिक्रियाश्राहत्यचतदर्थास्तिचोदितानान्यगामिनः। षष्ठीश्रुत्यानाहिताग्नेः
शेषत्वेनगम्यमानाः नार्थप्राप्तमाहिताग्निमालंबंते। तस्मादनाहिताग्न्यधिकारः। उपनयनादधीतहोमसंयोगात्। उप
नयनांगभूतमाणवककर्तृकाश्राचार्यकर्तृकाश्चहोमाः किमाहवनीयेस्युरुतलौकिकेग्नाविति। संशयेपूर्वविद्वचनाभावा
दाहवनीयेस्युः। माणवकार्थश्चितेहोमास्तत्रधिकाराश्रध्ययनांगभूतोपनयनार्थत्वादतएवतेमाणवकाग्नौकर्तव्या
इति। माणवकःप्रागुपनयनादारादधीततदर्थेचनभार्यंचोद्वहेत। यातुस्नात्वाभार्यामधिगच्छेदितिस्नानोत्तरकालदारक्रि
यासाग्न्रपत्यार्थाभविष्यतीतिप्राप्तेब्रूमः। श्राधानस्याविद्वदधिकारित्वाद्द्विपाषाश्चोपनयनाधीनत्वान्नोपनयनात्प्रा
गध्ययनसंभवः। किंचकर्मार्थैरेवदारैरयंत्वमपत्यार्थैश्चकर्मसिध्यतीतिनार्थःपृथग्दारक्रियया। किंच। यएवरत्यपत्य

श्रा० ४० कर्मर्थिनि दारसंग्रहः प्राप्तस्तस्यैवायं कालविधिः॥ स्नात्वा भार्यामधिगच्छेदिति। तस्मान्न प्रागदारसंग्रहः। तदभावे चाधानासंभ
वाल्लौकिक एवाग्नावुपनयनहोमः। स्थपतीष्टिः प्रयाजानवदग्न्याधेयं प्रयोजयेत्तादर्थ्याच्चापवृज्येत। एतया निषादस्थप
तिं याजयेदिति स्थपतीष्टिः किमाहितेष्वग्निषु स्यात्। उत लौकिक इति संशये प्रकृतेराहवनीयादिप्राप्तेराहवनीयादीनां
चाधानाधीनत्वाद्यद्यप्यस्य पतेराधानविधावपि समेवेष्टिराधानं प्रयोजयेदिति प्राप्ते उच्यते। यदास्याधानस्य नसा
क्षाद्विधिरभविष्यत्तदा याज्ञिकलोकप्रयोगान्नतं गार्हपत्यमादधातीत्याहवनीयमित्यादिवेदवाक्यपर्यालोचनेना
धानक्रियानिमित्तत्वं याचकादिवदाहवनीयादिशब्दानामाश्रित्य स्थपतिराहवनीयार्थमाधानमकरिष्यद्यदा तु वसंता
दिवचनान्याधानस्य विधायकानीति द्वितीये स्थितं तदा तद्विहिताधानजन्याग्निगतसंस्कारवाचित्वादाहवनीयादि
शब्दानां स्थपतिकर्तृकेन चाधानेनाविहितेन तत्संस्कारासिध्यनवगमात् नाधानस्याक्षेपसंभवः। तस्माल्लौकिके स्या
त्॥ ॥अवकीर्णिपशुश्च तद्वदाधानस्याप्राप्तकालत्वात्। यो ब्रह्मचार्यवकिरेत्स गर्दभं पशुमालभेतेति। किमयं पा एम ४०

गआहवनीमादिषु लौकिकेष्वेतिसंशयः। ब्रह्मचारिणस्तैवर्णिकत्वाद्द्विधावत्वाश्रयाधिगमसंभवाच्चाधानमुपपद्यन्तं। अत
एवाधायाग्निं प्रायश्चित्ते प्रवर्तेत। नैवं। नत्वुत्साववकरणकृतं ब्रह्मचर्यस्य विप्लवमसमाधाय गार्हस्थ्यप्रवेशः संभवति। अ
विप्लुतब्रह्मचर्योगृहस्थाश्रममावसेदिति विधानात्। नचापत्नीकस्याधानमस्ति तस्माद्धोलौकिकेश्वावपं यश्चु लौकिक
श्चदाचाराग्न्याम्नः। उदगयन पूर्वपक्षातःपुण्याहेषु देवानि स्मृति रूपान्यार्थदर्शनात्। उपनयन चौलादीनि किं सर्वका
लेस्युः। उतोदगयनादिषु इति संशये विशेषाभावात्सर्वदेवाधिकारः। स्मृतेस्तूदगयनादिष्वेवस्युर्दैवानि॥ ॥एतेष्वपि
श्राणि। पित्र्याणि तु श्राद्धादीनि अपरपक्षादिषु स्मृतेरेव॥ ॥पात्राक्रयणमविद्यमाने लोकवत्ज्योतिष्टोमे याज्याक्र
यणमाम्नातं द्वादशरात्री दीक्षितो भृतिं वन्वीतेति याज्या। अरुणयापिंगाक्ष्याक्रीणातीति क्रयः। तत्र संशयः। किं यस्य दक्षि
णाद्रव्यं नास्ति सोमश्च तस्येदं याज्याक्रयणं उत विद्यमानेपीति। तत्र द्रव्यार्थं याज्याक्रयणमविद्यमानद्रव्यस्यस्यात् द्रव्य
स्यस्यात् द्रव्यवतस्त्वनर्थकं। तस्मान्न तस्य पात्राद्यावधिकारः। स्यादेवं यदि द्रव्यवतस्त्वनर्थकं। तस्मान्न तस्य पात्राद्यावधि

श्रा० ४९

कारः। स्यादेवं यदि द्रव्यमात्रं प्रयुक्तं स्यात् स्वरूपं प्रयुक्तं त्विदं ग्रतो नेनविना। अपूर्वमिव वैगुण्यान्नोत्पद्यते। तस्मान्नित्यं पाज्ञाश्रय
णं। तथा भक्ष्यप्रैषाच्छादनसंज्ञप्तहोमद्वेष्यं पयोव्रतं ब्राह्मणस्येति भक्षः किमविद्यमाने भक्ष्यां तरे उत भक्ष्याऽसंभवे च। तथा
प्रादेशात्त्विह रेतिप्रैषः किमन्यतो नवबुद्धे प्रैषार्थे। अहतं वासः परिधत्त इति च वाससोंत एभावो तथा यत्पशुर्मायुमकृते
ति संज्ञप्तहोमो मा पुकरणे। तथा स्माद्योनि द्वेष्टि यं च वयं द्विष्म इति मंत्रो द्वेष्यसंभावे। उत सर्वमिदं नित्यमिति संशये सामर्थ्या
द्वेषां निमित्तसंभावेनुष्ठानमिति निमित्ताश्रवणात्तस्यापि चान्यस्मिन्नियमाद्दृष्टसिद्धेरनन्योपायत्वान्नित्यं। अनर्थकं
त्वनित्यं स्यात्॥ ॥ यदा पुनर्व्रतयमानं पयो न जीर्यति साशंकते। तदापि किमवश्यं व्रतयितव्यं। नेत्याह। तथा हि यज
मानस्य रोगोत्पत्तावक्रतु विरोध एव संभाव्येत। तेन प्रधानविरोधान्नव्रतयितव्यं॥ ॥पशुचोदनायामनियमो विशेषात्
॥ ॥अग्नीषोमीयं पशुमालभेतेति किं यः कश्चित्पशुरालब्धव्य उत छाग एव। चोदनायां सामान्यश्रवणान्मंत्रवर्णे च छाग
स्य वपाया मेदस इति छागशब्दश्रवणात्संशयः। तत्र सामान्यावसिततात्तु चोदनावाक्यभेदतः। मंत्रस्तदविरोधेनपा एम ४९

शा॰ ४२ क्षिकोयौगिकोपिवाविधिस्तस्योरेकवाक्यत्वात्स्याकृस्तुतेरपर्यवसितोंजनविधिरर्थवादगतघृतविषयएवपर्यवस्यतिमंत्र
चोदनयोस्तुवाक्यभेदात्प्रतिबद्धंविधिवाक्यंपशुसामान्येपर्यवसितंनमंत्रानुरोधेनशक्यंविशेषंनेतुंमंत्रस्तुचोदितार्थ
प्रकाशनात्परतंत्रइतिश्चोदनावगतंगवाश्वादिजातेनिगमादिवशलब्धावयवयोगेनप्रकाशयिष्यति।यदावाछाग
स्तदाप्रयोक्ष्यतेतेनतस्मादनियमः।उच्यते।चोदनापशुसामान्यमंगत्वेनावबोधयेत्।छागेप्यविकलंतत्तुप्रतिव्यक्तिसमा
प्तितः।मंत्रःप्रकरणाम्नानान्निःसमंगंप्रतीयते।कृत्स्नयाहृदिशब्दाच्चसच्छागस्यैववाचकः।तेनतंतादृशंरूढंविधिरा
स्याविरोधिने।विधत्तेछागमेवांगंतस्मात्छागोपसंग्रहः।अधिकृतिरितिसिद्धाभेदशेषप्रयुक्तिक्रमनियमविचारेरेत
याचाधिकृत्या।सुविदितउपदेशोनंतरंचातिदेशोविकृतिषुततऊहोबाधतंत्रप्रसंगाः॥ ॥इतिमहोपाध्यायश्रीपार्थसा
रथिमिश्रविरचितायांशास्त्रदीपिकायांषष्ठस्याध्यायस्याष्टमःपादः।समाप्तः॥ ॥संवत् १८ ७५ ६ राम ४२

४२